# sAMkhyatattvavivechanam

# સાઙ્ખ્યતત્ત્વવિવેચનમ્

## Document Information

Text title : sAMkhyatattvavivecanam

File name : sAMkhyatattvavivecanam.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Source : sAnkhyasaNgrahaH 1918

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# સાઙ્ખ્યતત્ત્વવિવેચનમ્

## ॥ શ્રીષિમાનન્દવિરચિતમ્ ॥

રઘુનન્દનસુતેનેદમિષ્ટિકાપુરવાસિના ।
કાન્યકુબ્જદ્વિજાગ્ર્યેણ ષિમાનન્દેન તન્યતે ॥ ૧॥

સાંખ્યોપજ્ઞ નમસ્તુભ્યં કપિલાય મહાત્મને ।
પઞ્ચવિંશતિતત્ત્વાનાં તત્ત્વજ્ઞાનપ્રવર્તકઃ ॥ ૨॥

દુઃખત્રયાભિભૂતસ્ય શાન્તિર્મે સ્યાત્ કુતસ્ત્વિહ ।
તથોપદિશ જન્માદિ યથા ન સ્યાત્ કૃપાનિધે ॥ ૩॥

એવં પૃષ્ટો મુનિઃ પ્રાહ નિર્વિણ્ણાય કૃપાનિધિઃ ।
પઞ્ચવિંશતિસૂત્રાણિ વ્યાખ્યાતાનિ મહાત્મભિઃ ॥ ૪॥

બબન્ધુઃ કવયઃ કાવ્યે વ્યાચિખ્યુઃ કવયઃ પરે ।
સાંખ્યશાસ્ત્રસ્ય યાથાર્થ્યં તદેવેદં વિવિચ્યતે ॥

ષિમાનન્દેન મન્દેન કુક્ષિમ્ભરિશતાદિના ॥ ૫॥

## અષ્ટૌ પ્રકૃતયઃ ॥ ૧ ॥

પ્રકૃતિર્બુદ્ધ્યહંકારૌ તન્માત્રૈકાદશેન્દ્રિયમ્ ।
ભૂતાનિ ચેતિ સામાન્યાચ્ચતુર્વિંશતિરેવ તે ॥

એતેષ્વેવ ધર્મધર્મ્યભેદેન ગુણકર્મસામાન્યાનામન્તર્ભાવઃ ।
પ્રકૃતિત્વં ચ સાક્ષાત્પરમ્પરયાખિલવિકારોપાદાનત્વમ્ ।
વ્યુત્પત્તિસ્તુ પ્રકૃષ્ટા પરિણામરૂપા આકૃતિરસ્યા ઇતિ । સા ચ
સામ્યાવસ્થયોપલક્ષિતસત્ત્વાદિદ્રવ્યત્રયરૂપા । સામ્યાવસ્થા
ચ શાન્તઘોરમૂઢાદિરૂપાણામપિ અસમુદાયવદ્રૂપત્વેપિ

અતિશયૈઃ સમુદાયવદ્ભિરવિરોધેન વર્તમાનત્વં સામાન્યાત્મના ગુણભાવોऽતિશયાત્મના પ્રાધાન્યં વિશેષાત્મના વૈષમ્યમિત્યતો ન્યૂનાધિકભાવેનાસંહતાવસ્થાऽકાર્યાવસ્થેતિ યાવત્ । મહદાદિકં તુ કાર્યસત્ત્વાદિકં ન કદાપ્યકાર્યાવસ્થં ભવતીતિ તદ્વ્યાવૃત્તિઃ । વૈષમ્યાવસ્થાયામપિ પ્રકૃતિત્વસિદ્ધયે ઉપલક્ષિતમિત્યુક્તં સત્ત્વાદિગુણવતી પ્રકૃતિઃ સત્ત્વાદ્યનતિરિક્તત્વાત્ તથા ચ સૂત્રં સત્ત્વાદીનામતદ્ધર્મત્વં તદ્રૂપત્વાદિતિ સત્ત્વાદીનાં પ્રકૃતિસ્વરૂપત્વં ન તુ પ્રકૃતિધર્મત્વમ્ । ગુણેભ્ય એવ સર્વકાર્યોપપત્તૌ તદન્યપ્રકૃતિકલ્પનાવૈયર્થ્યાત્ । સૂત્રભાષ્યાભ્યામપિ તથોક્તત્વાત્ । યત્તુ પ્રકૃતેર્ગુણા ઇતિવત્ વનસ્ય વૃક્ષા ઇતિવત્ વ્યષ્ટિસમષ્ટ્યભિપ્રાયેણેતિ સત્ત્વં રજસ્તમ ઇતિ પ્રકૃતેરભવન્ ગુણા ઇતિ ચ ન સત્ત્વાદીનાં પ્રકૃતિકાર્યત્વવચનં ગુણનિત્યતાવાક્યવિરોધેન મહત્તત્ત્વકારણીભૂતકાર્યસત્ત્વાદિપરમ્ । મહદાદિસૃષ્ટિર્ગુણવૈમ્યાત્ । તચ્ચ સજાતીયસંવલનેન ગુણાન્તરવ્યાવૃત્તપ્રકાશાદિફલોપહિતઃ સત્ત્વાદિવ્યવહારયોગ્યઃ પરિણામ ઇતિ સત્ત્વાદિવ્યવહારો વૈષમ્ય એવેત્યાહ શ્રુતિઃ યથા તમ એવેદમગ્ર આસીત્ તત્પરે સ્યાત્ પરેણેરિતં વિષમત્વં(૧) પ્રત્યયાદ્વૈ રજસો(૨) રૂપં તદ્રજઃ ખલ્વીરિતં વિષમત્વં પ્રત્યયાદ્વૈ સત્ત્વસ્ય(૩) રૂપમિતિ સત્ત્વાદિત્રયં ચ સત્ત્વાદિસ્વરૂપમિતિ સત્ત્વાદિત્રયં ચ સુખપ્રકાશલાઘવપ્રસાદાદિગુણકતયા સંયોગવિભાગાદિમત્તયાનાશ્રિતત્વોપાદાનત્વાદિના દ્રવ્યત્વેऽપિ પુરુષોપકારત્વાત્ પુરુષબન્ધકત્વાચ્ચ ગુણશબ્દેનોચ્યતે ઇન્દ્રિયાદિવત્ ગુણાનાં સુખદુઃકમોહાત્મકપ્રવાદસ્તુ ધર્મધર્મ્યભેદાત્ મનસઃ સઙ્કલ્પાત્મકત્વવત્ તત્ર સત્ત્વં સુખપ્રસાદપ્રકાશાદ્યનેકધર્મકમપિ પ્રધાનતસ્તુ સુખાત્મકમુચ્યતે । એવં રજોऽપિ દુઃખકાલુષ્યપ્રવૃત્યાદ્યનેકધર્મકં પ્રાધાન્યતસ્તુ દુઃખાત્મકમુચ્યતે । એવં તમોऽપિ મોહાવરણસ્તમ્ભનાદ્યનેકધર્મકં પ્રાધાન્યતસ્તુ મોહાત્મકમુચ્યતે । સતો ભાવઃ સત્ત્વં ધર્મપ્રાધાન્યેનોત્તમં પુરુષોપકરણં રાગયોગાદ્રજો મધ્યમમ્ । તમોધર્માવરણયોગાદધમં સત્ત્વાદીન્યસંખ્યવ્યક્તયઃ પ્રતિક્ષણપરિણામિત્વાત્ લઘુત્વાદિધર્મૈરન્યોન્યં સાધર્મ્યં વૈધર્મ્યં ચ ગુણાનામસંખ્યાતમિતિ સૂત્રાત્ । એકદાનેકપુરુષાદિસૃષ્ટિશ્રવણાચ્ચ એકૈકવ્યક્તિત્વે વિભુત્વં સ્યાત્ તથા ચ સંયોગવૈચિત્ર્યાભાવાદનન્તવૈચિત્ર્યં કાર્યાણાં ન સ્યાત્ ।

દ્રવ્યાન્તરસ્યાવચ્છેદકીભૂતસ્યાભાવાચ્ચ । તસ્માદસંખ્યાતાન્યેવ સત્ત્વાદીનિ ત્રિત્વકથનં તુ વિભાજકોપાધિત્રયેણૈવ વૈશેષિકાણાં નવદ્રવ્યવચનવત્ સત્ત્વાદીનિ ચ યથાયોગ્યમણુવિભુપરિમાણકાનિ ઇતરથા રજસશ્ચલસ્વભાવત્વવચનનિરોધઃ સ્યાત્ । આકાશકારણસ્ય વિભુત્વૌચિત્યાત્ સર્વકારણદ્રવ્યવિભુત્વે કાર્યપરિચ્છેદાસમ્ભવ ઇતિ ॥

શબ્દસ્પર્શવિહીનં તદ્રૂપાદિભિરસંહતમ્ ।
ત્રિગુણં તજ્જગદ્યોનિરનાદિપ્રભવાપ્યયમ્ ॥

ઇત્યાદ્યુક્તેર્ન પરમાણ્વાદાવન્તર્ભાવઃ પ્રકૃતેરિતિ ।
અથૈવમપિ પ્રકૃતેરણુવિભુસાધારણસત્ત્વાદ્યનેકવ્યક્તિરૂપત્વે અપરિચ્છિન્નત્વૈકત્વાક્રિયત્વસૈદ્ધાન્તક્ષતિરિતિ ચેન્ન કારણદ્રવ્યત્વસ્વરૂપપ્રકૃતિત્વેનૈવાપરિચ્છિન્નત્વવચનાદ્ગન્ધત્વેન ગન્ધાનાં પૃથિવીવ્યાપકતાવત્ આકાશાદિપ્રકૃતીનાં વિભુત્વેનૈવ પ્રકૃતિવિભુત્વસિદ્ધાન્તોપપત્તેશ્ચ । તથા પુરુષભેદેન સર્ગભેદેન ચ ભેદાભાવસ્યૈવ એકશબ્દાર્થત્વાત્ । અજામેકામિતિશ્રુતેસ્તથાવગમાત્ । તથાધ્યવસાયોઽભિમાનાદિક્રિયારાહિત્યસ્યૈવાક્રિયશબ્દાર્થત્વાદિત્યન્યથા શ્રુતિસ્મૃતિત્યુક્તસ્ય પ્રકૃતિક્ષોભસ્યાનુપપત્તેરિતિ । તત્રાયં પ્રયોગઃ સુખદુઃખમોહાત્મકમહદાદિકાર્યં સુખદુઃખમોહાત્મકદ્રવ્યકાર્યં સુખદુઃખમોહાત્મકત્વાત્ વસ્ત્રાદિકાર્યશય્યાવદિતિ પ્રકૃતૌ પ્રમાણમ્ । બાહ્યવસ્તુષુ સુખાદિકમુત્તમત્વાદિકમેવ ઘટરૂપમિતિવચ્ચન્દનસુખં સ્ત્રીસુખમિત્યાદિપ્રત્યયાચ્ચેતિ દિક્ ।
અવ્યક્તબુદ્ધ્યહઙ્કારાસ્તન્માત્રાણાં ચ પઞ્ચકમ્ ।
અષ્ટૌ પ્રકૃતયસ્ત્વેતાઃ સપ્ત ચ વ્યક્તતામિયાત્ ॥

અવ્યક્તપ્રકૃતિજન્યત્વાત્ અવ્યક્તાનીતિ ચોચ્યતે ।
વ્યજ્યન્તે ચ યથા લોકે ઘટાદ્યા ન તથા હિ તત્ ॥

અવ્યક્તં પ્રકૃતિર્માયા પ્રધાનં બ્રહ્મ કારણમ્ ।
અવ્યાકૃતં તમઃપુષ્પં ક્ષેત્રમક્ષરનામકમ્ ॥

બહુધાત્મકાદિનામાનિ તસ્યામી તે જગુર્બુધાઃ ।
વ્યજ્યતે નેન્દ્રિયૈર્યસ્માદવ્યક્તમત ઉચ્યતે ।
અનાદિમધ્યનિધનાન્નિરઙ્ગત્વેન તત્ તથા ॥

તદેવાહ શ્રુતિઃ ।

અશબ્દમસ્પર્શમરૂપમવ્યયં
યથા ચ નિત્યં રસગન્ધવર્જિતમ્ ।
અનાદિમધ્યં મહતઃ પરં ધ્રુવમ્
પ્રધાનમેતત્ પ્રવદન્તિ સૂરયઃ ॥ ઇતિ
તસ્માદલિઙ્ગકં સૂક્ષ્મં તથા પ્રસવધર્મિકમ્ ।
એકં સાધારણં તત્ર કાર્યં કસ્યાપિ નેતરે ॥

બુદ્ધિર્મહાન્ મનો બ્રહ્મા મતિઃ ખ્યાતિરપૂર્વકમ્ ।
પ્રજ્ઞા ભૂતિર્ધૃતિર્જ્ઞાનં સન્તતિઃ સ્મૃતિરિત્યપિ ॥

હૈરણ્યગર્ભ્યા બુદ્ધેસ્તુ મહતો નામ સૂચિતમ્ ।
ગુણેભ્યઃ ક્ષોભ્યમાણેભ્યસ્ત્રયો વેદા વિજજ્ઞિરે ॥

એકા મૂર્ત્તિસ્ત્રયો દેવા બ્રહ્મવિષ્ણુમહેશ્વરાઃ । ઇતિ
વિષ્ણુરેવાદિસર્ગેષુ સ્વયંભૂર્ભવતિ પ્રભુઃ ॥

અત્ર સત્ત્વાદ્યંશત્રયેણ મહતો દેવતાત્રયોપાધિત્વાત્તદવિવેકેન તિસ્ર ઇતિ । સાત્ત્વિકાંશાત્ પ્રધાનાત્ તુ મહત્તત્ત્વમજાયત ઇતિ મહત્ત્વસ્ય પ્રાધાન્યેન ચાધ્યવસાયો વૃત્તિર્મહદહંકારમનસ્ત્રિતયાત્મકસ્યાન્તઃકરણવૃક્ષસ્ય મહત્તત્ત્વં બીજાવસ્થા તદુક્તં સાંખ્યસૂત્રે ઇદમેવ મહત્તત્ત્વમંશતો રજસ્તમઃસંભેદેન પરિણતં સત્ વ્યષ્ટિજીવાનામુપાધિરધર્માદિયુક્તં ક્ષુદ્રમપિ ભવતિ મહદુપરાગાદ્વિપરીતમિતિ । મહતસ્ત્રિગુણસ્વરૂપત્વાદ્દેહસ્ય દેહિના કાલરૂપવિષ્ણુના ક્ષોભ્યદશાયાં ગુણરૂપોપાધિપ્રાધાન્યાદવિવેકે બ્રહ્મવિષ્ણુશિવત્વં તત્ર મહાન્ સુષુપ્ત્યભિમાની શિવસ્તદુપાધિસ્તમઃકાર્યરૂપી તત્ર સ્વપ્નાભિમાની વિષ્ણુસ્તદુપાધિઃ કાર્યસત્ત્વં તત્ર જાગ્રદભિમાની બ્રહ્મા તદુપાધિઃ કાર્યરજઃ તત્ર સમુદાયસમુન્નયનન્યાયેન સમષ્ટેર્વ્યષ્ટ્યનન્યત્વાન્મશકાદિરપિ વિષ્ણુરેવેતિ ભાવઃ । સૃષ્ટિસ્તુ મહદાદિક્રમેણૈવ ન તુ ભૂતાદિક્રમેણેતિ ॥

સા ચ કૌર્મે
ભૂતાદિસ્તુ વિકુર્વાણઃ શબ્દમાત્રં સસર્જ હ ।
આકાશસુષિરં તસ્માદુત્પન્નં શબ્દલક્ષણમ્ ॥

આકાશં તુ વિકુર્વાણઃ સ્પર્શમાત્રં સસર્જ હ ।
વાયુરુત્પદ્યતે તસ્માત્તસ્ય સ્પર્શો ગુણો મતઃ ॥ ઇત્યાદિ

નન્વેવં ચેદાકાશાદીનાં કેવલં વિકૃતિત્વં કથં તત્ર આકાશાદીનાં સ્પર્શાદિતન્માત્રેષુ અહંકારોપષ્ટમ્ભમાત્રેણ કારણત્વસ્ય પુરાણાદિષૂક્તત્વાત્ ।

ન પુમાન્ સ્થાણુરેવાયં બુદ્ધિરધ્યવસાયિની ।
પુરુષાધિષ્ઠિતાત્ સર્વગતાજ્જાતા પ્રધાનતા ॥

ચિચ્છક્તિર્યાદૃશી તાદૃગ્ વૃત્તિઃ સત્ત્વવિમિશ્રિતા ।
રજોગુણસ્વરૂપા યત્ ત્રિવૃત્કરણતઃ શ્રુતેઃ ॥

જ્ઞાનં ધર્મશ્ચ વૈરાગ્યમૈશ્વર્યં સત્ત્વતો હ્યમી ।
અનૈશ્વર્યમવૈરાગ્યમધર્મોઽજ્ઞાનમેવ તુ ॥

તમસશ્ચાપિ તે જ્ઞેયા બુદ્ધેર્ભેદા ઇતીરિતાઃ ।
જ્ઞાનં તત્ત્વાવબોધોઽયં ધર્મઃ શ્રુત્યુક્તપાલનમ્ ॥

વૈરાગ્યમર્થાનાસક્તિરૈશ્વર્યમણિમાદિકમ્ ।
તત્તદ્વિપર્યયેણૈવ તામસં તચ્ચતુષ્ટયમ્ ॥

જ્ઞાનેન મોક્ષો ધર્મેણ ગતિરૂર્ધ્વા ભવેદિતિ ।
વૈરાગ્યેનાક્ષરલય ઐશ્વર્યેણાહતા ગતિઃ ॥

એવમેષાષ્ટધા શક્તિર્વ્યાખ્યાતા બુદ્ધિસઞ્જ્ઞિતા ।
પ્રધાનવિકૃતિસ્ત્વેષાહંકારપ્રકૃતિશ્ચ સા ॥

મૂલપ્રકૃતિરિત્યાદિ કવિભિશ્ચ નિરૂપિતમ્ ।
એકોઽહંકાર ઇત્યેતજ્જિજ્ઞાસા ચેદ્વિભાવય ॥

યોઽહંશબ્દં કરોત્યેષ અભિમાન ઇતિ સ્મૃતઃ ।
સ્પૃશેઽહં રસયે વાહં સ્વામી ચાહં મયા હૃતઃ ॥

ઇત્યાદિ નામ યસ્યાસીત્તસ્ય ભેદા અમી શ ૃણુ ।
વૈકારિકસ્તૈજસોઽપિ ભૂતાદિઃ સાનુમાનકઃ ॥

નિરનુમાનશ્ચ પઞ્ચૈતે ભેદાસ્તસ્ય પ્રકીર્ત્તિતાઃ ।
વૈકારિકઃ સાત્ત્વિકોઽયં ભૂતાદિસ્તામસઃ સ્મૃતઃ ॥

તૈજસો રાજસો જ્ઞેયસ્તસ્માત્ તન્માત્રપઞ્ચકમ્ ।
એકાદશેન્દ્રિયગણઃ સાત્ત્વિકાદભિજાયતે ॥

દેવતાસ્ત્વભિમાનિન્યસ્તૈજસાદપિ ચોચ્યતે ।

તદેવ કથમેવં ચેત્ ત્રિવૃત્કરણહેતુતઃ ॥

શબ્દતન્માત્રમિત્યેતત્ શબ્દ એવોપલભ્યતે ।
ન તૂદાત્તનિષાદાદિભેદસ્તસ્યોપલભ્યતે ॥

સ્પર્શતન્માત્રમેવૈતત્ સ્પર્શ એવોપલભ્યતે ।
ન તુ શીતમૃદુત્વાદિવિશેષસ્તસ્ય લભ્યતે ॥

રૂપતન્માત્રમેવં વૈ રસતન્માત્રમપ્યથ ।
ગન્ધતન્માત્રમેતેષુ વિશેષો નોપલભ્યતે ॥

તન્માત્રાણ્યવિશેષાણિ સૂક્ષ્મભૂતાનિ ચોચ્યતે ।
ભોગ્યાનિ શાન્તઘોરાનિ પ્રકૃત્યાઽણવ એવ ચ ॥

કુર્વદ્રૂપાત્ પ્રકૃતયઃ સંખ્યયાઽષ્ટૌ પ્રકીર્ત્તિતાઃ ॥

## ષોડશ વિકારાઃ ॥ ૨ ॥

એકાદશૈવેન્દ્રિયાણિ મહાભૂતાનિ પઞ્ચ ચ ।
વિકારાઃ ષોડશૈવૈતે ન તુ પ્રકૃતિતાજુષઃ ॥

શ્રોત્રં ત્વક્ ચક્ષૂષી જિહ્વા ઘ્રાણં જ્ઞાનેન્દ્રિયં ત્વિદમ્ ।
વાક્પાણિપાયૂપસ્થપાદાઃ કર્મેન્દ્રિયં મતમ્ ॥

સ્વં સ્વં કર્મ પ્રકુર્વન્તિ જ્ઞાનં ચેતિ યથૈષિતમ્ ।
ઉભયાત્મકં મનશ્ચૈવ સંકલ્પાદિસ્વરૂપવત્ ॥

કરણાનીન્દ્રિયાણીતિ વૈકારિકમયં રયઃ ।
પદાનિ નિયતાનીત્યક્ષાણીત્યભિધીયતે ॥

પૃથિવીજલતેજાંસિ વાયુરાકાશ ઇત્યપિ ।
મહાભૂતાનિ પઞ્ચૈવ ધારણાદ્યુપકારતઃ ॥

આપઃ સંગ્રહભાવેન ચતુર્ણામુપકારિકાઃ ।
તેજઃ પાચકભાવેન વાયુર્વહનભાવતઃ ॥

શબ્દાદિપઞ્ચગુણવત્પૃથ્વી પઞ્ચગુણા મતા ।
આપઃ શબ્દાદિસહિતાઃ ગન્ધેન રહિતાસ્તથા ॥

તેજઃ શબ્દસ્પર્શવત્ રૂપવત્ શ્વસને પુનઃ ।

શબ્દશ્ચ સ્પર્શ ઇત્યેવમાકાશે શબ્દ એવ તુ ॥

ન તુ વિગ્રહભૂતાનિ વિશેષાકૃતયસ્તથા ।
વિકારાઃ શાન્તઘોરાખ્યમૂઢાઃ ત્રિવિધકીર્ત્તિતાઃ ॥

## પુરુષઃ ॥ ૩ ॥

પુરિ શયનાત્ પ્રમાણાત્ પૂરણાત્ પુરુવૃત્તિતઃ ।
સ ચાનાદિઃ સર્વગતશ્ચેતનો નિર્ગુણોઽપરઃ ॥

દ્રષ્ટા ભોક્તા ક્ષેત્રવિદમલોઽપ્રસવધર્મકઃ ।
સૂક્ષ્મો નિત્યો હ્યનાદિસ્ત્વમધ્યનિધનોઽપિ સઃ ॥

સર્વમાપ્નમનેનેતિ તસ્માત્ સર્વગતસ્તુ સઃ ।
સુખોપલબ્ધિમત્ત્વાચ્ચ ચેતનો નિર્ગુણસ્તથા ॥

સત્ત્વાદિગુણરાહિત્યાત્ પરઃ પરતયા સ્મૃતઃ ।
દૃશ્યપ્રકૃતિસમ્બન્ધાત્ દ્રષ્ટા ભોક્તાઽનુભાવનાત્ ॥

ક્ષેત્રે ગુણગતં વેત્તિ ક્ષેત્રજ્ઞ ઇતિ કીર્ત્તિતઃ ।
શુભાશુભાદિસંસર્ગાભાવાદમલ ઈષ્યતે ॥

નિર્બીજત્વાત્ પ્રસૂતે ચ નેત્યપ્રસવધર્મકઃ ।
નિરઙ્ગત્વાતીન્દ્રિયત્વાત્ સૂક્ષ્મો નિત્યઃ સદાતનાત્ ॥

એવં સાંખ્યઃ સ પુરુષો વ્યાખ્યાતઃ પૂર્વસૂરિભિઃ ।
જીવો જન્તુઃ પુમાનાત્મા પુરુષઃ પૂજકો નરઃ ॥

ક્ષેત્રજ્ઞશ્ચાક્ષરઃ પ્રાણઃ કોય એષઃ સ જ્ઞસ્તથા ।
અજ એતાનિ નામાનિ સાંખ્યે પુરુષસઞ્જ્ઞિતે ॥

એવમ્,
પઞ્ચવિંશતિતત્ત્વજ્ઞો યત્ર કુત્રાશ્રમે રતઃ ।
મુણ્ડી જટી શિખી વાપિ મુચ્યતે નાત્ર સંશયઃ ॥

અયં કર્તાઽથવાઽકર્ત્તા પુરુષઃ પ્રકૃતેઃ પરઃ ।
શુભાશુભાનિ કર્ત્તા ચેત્ કુર્યાદ્વૃત્તિત્રયં વિના ॥

લોકદૃષ્ટગુણાનાં ચેત્ કર્તૃતા ધર્મિતા કથમ્ ॥

સાહિત્યં યમનિયમનિષેચનપ્રસંખ્યાનાત્ ।
જ્ઞાનૈશ્વર્યવિકારપ્રકાશને સાત્ત્વિકી વૃત્તિઃ ॥

રાગઃ ક્રોધો લોભઃ પરપરિવાદો નિન્દા તુષ્ટિઃ ।
વિકૃતાકૃતપારુષ્યં પ્રખ્યાતૈષા રજોબુદ્ધિઃ ॥

ઉન્માદમદવિષાદા નાસ્તિક્યં સ્ત્રીપ્રસઙ્ગિતા ।
નિદ્રાલસ્યં નૈર્ઘૃણ્યં ત્વશૌચમિતિ તામસી વૃત્તિઃ ॥

એતદ્વૃત્તિત્રયં દૃષ્ટ્વા ગુણાનાં કર્તૃતાઽથવા ।
અકર્તા પુરુષઃ સિદ્ધ ઇતિ સિદ્ધાન્ત ઇષ્યતે ॥

પ્રવર્ત્તમાનપ્રકૃતેરિમાન્ ગુણાન્
રજસ્તમોભ્યાં વિપરીતદર્શનાત્ ।
આત્માનમાચ્છાદ્ય સ આત્મને તદ્
અહઙ્કરોમીત્યબુધોઽવમન્યતે ॥

બાલાગ્રકુક્ષીકરણાસમર્થઃ
સર્વં મયેદં કૃતમિત્યમન્યત ।
ઉન્મત્તવદ્ભાવ્યત ઇત્યબોધઃ
અહો વિધે પણ્ડિતમાનિનઃ કઃ ॥

તદુક્તં ગીતાસુ
પ્રકૃતેઃ ક્રિયમાણાનિ ગુણૈઃ કર્માણિ સર્વશઃ ।
અહઙ્કારવિમૂઢાત્મા કર્તાઽહમિતિ મન્યતે ॥

અનાદિત્વાન્નિર્ગુણત્વાત્ પરમાત્માઽયમવ્યયઃ ।
શરીરસ્થોઽપિ કૌન્તેય ન કરોતિ ન લિપ્યતે ॥

પ્રકૃત્યૈવ ચ કર્માણિ ક્રિયમાણાનિ સર્વશઃ ।
યઃ પશ્યતિ સદાઽઽત્માનમકર્તારં સ પશ્યતિ ॥ ઇત્યાદિ ।
સ એકઃ પુરુષઃ કિં વા નાનેતિ ચ વિચારય ।
સુખદુઃખમોહસઙ્કરવિશુદ્ધજન્મમરણાનામ્ ।
નાનાત્વાત્ પુરુષબહુત્વં સિદ્ધં લોકાશ્રમવર્ણભેદાચ્ચ ॥

યદ્યેકઃ પુરુષઃ સ્યાદ્ બુદ્ધિહાનિઃ પ્રસજ્યતે ।
એકસ્મિન્ સુખિતે સર્વે સુખિનઃ સ્યુરતઃ પરમ્ ।
એકસ્મિન્ દુઃખિતે સર્વે દુઃખિતાઃ સ્યુરિતિ ક્રમાત્ ॥

અતો બહુત્વં સંસિદ્ધં બહવઃ પુરુષાઃ સ્મૃતાઃ ।
આકૃતિગર્ભાશયભાવસઙ્ગતિશરીરવિભાગાલ્લિઙ્ગબહુત્વાત્ સાંખ્યાચાર્યાઃ
કપિલાસુરિપઞ્ચશિખપતઞ્જલિપ્રભૃતયઃ પુરુષબહુત્વં વર્ણયન્તિ ।
વેદવાદિન આચાર્યા હરિહરહિરણ્યગર્ભવ્યાસાદય એકમાત્માનં, તથા ચ
શ્રુતિઃ ।
પુરુષ એવેદં સર્વં યદ્ભૂતં યચ્ચ ભાવ્યમ્ ।
ઉતામૃતત્વસ્યેશાનો યદન્યેનાતિરોહતિ ।
તદેવાગ્નિસ્તદાદિત્યસ્તદ્વાયુસ્તદુ ચન્દ્રમાઃ ॥

તદેવ શુક્રં તદ્બ્રહ્મ તા આપઃ સ પ્રજાપતિઃ ।
તદેવ સત્યમમૃતં સ મોક્ષઃ સા પરા ગતિઃ ॥

તદક્ષરં તત્સવિતુર્વરેણ્યં યસ્માત્ પરં નાપરમસ્તિ કિઞ્ચિત્ ।
યસ્માન્નાણીયો ન જ્યાયોઽસ્તિ કિઞ્ચિત્ ॥

વૃક્ષ ઇવ સ્તમ્ભો દિવિ તિષ્ઠત્યેકઃ તેનેદં પૂર્ણં પુરુષેણ ।
સર્વતઃ પાણિપાદં તત્ સર્વતોઽક્ષિશિરોમુખમ્ ॥

સર્વતઃ શ્રુતિમલ્લોકે સર્વમાવૃત્ય તિષ્ઠતિ ।
સર્વેન્દ્રિયગુણાભાસં સર્વેન્દ્રિયવિવર્જિતમ્ ॥

સર્વસ્ય પશુમીશાનં સર્વસ્ય શરણં મહત્ ।
સર્વતઃ સર્વસત્ત્વાનિ સર્વાત્મા સર્વસમ્ભવઃ ॥

સર્વં વિલીયતે યસ્મિન્ તદ્બ્રહ્મ મુનયો વિદુઃ ।
એક એવ હિ ભૂતાત્મા ભૂતે ભૂતે વ્યવસ્થિતઃ ॥

એકધા બહુધા ચૈવ દૃશ્યતે જલચન્દ્રવત્ ।
સ હિ સર્વેષુ ભૂતેષુ સ્થાવરેષુ ચરેષુ ચ ॥

વસત્યેકો મહાનાત્મા યેન સર્વમિદં તતમ્ ॥ ઇત્યાદિ ।

## ત્રૈગુણ્યમ્ ॥ ૪ ॥

સત્ત્વં રજસ્તમ ઇતિ ગુણાઃ ભાવેણ્યસ્ત્રૈગુણ્યમ્ ।
પ્રસાદો લાઘવં સઙ્ગઃ પ્રસઙ્ગાત્ પ્રીતિરાર્જવમ્ ॥

તુષ્ટિસ્તિતિક્ષા સત્ત્વસ્ય રૂપં સાક્ષાત્ સુખાવહમ્ ।

શોકસ્તમ્ભદ્વેષતાપખેદભોગાભિમાનિતા ॥

રજોરૂપાણ્યનેકાનિ બહુદુઃખપ્રદાનિ વૈ ।
તમો નામાચ્છાદનાદિ બીભત્સાવરણાદિ ચ ॥

દૈન્યગૌરવનિદ્રાદિપ્રમાદાલસ્યલક્ષણમ્ ।
મોહાત્મકમનન્તં તદેવં ત્રૈગુણ્યમીરિતમ્ ।
સત્ત્વં પ્રકાશકં વિદ્યાદ્રજો વિદ્યાત્ પ્રવર્ત્તકમ્ ॥

વિનાશકં તમો વિદ્યાત્ ત્રૈગુણ્યં નામ સઞ્જ્ઞિતમ્ ।

## સઞ્ચરઃ ॥ ૫ ॥

સામ્યાવસ્થા ગુણાનાં યા પ્રકૃતિઃ સા સ્વભાવતઃ ।
કાલક્ષોભેણ વૈષમ્યાત્ ક્ષેત્રે પરયુતે પુરા ॥

બુદ્ધિસ્તતશ્ચાહઙ્કારસ્ત્રિવિધોઽપિ વ્યજાયત ।
તન્માત્રાણીન્દ્રિયાણિ મહાભૂતાનિ ચ ક્રમાત્ ॥

એવં ક્રમેણૈવોત્પત્તિઃ સઞ્ચરઃ પરિકીર્ત્તિતઃ ।

## પ્રતિસઞ્ચરઃ ॥ ૬ ॥

વ્યુત્ક્રમેણૈવ લીયન્તે તન્માત્રે ભૂતપઞ્ચકમ્ ।
તન્માત્રાણીન્દ્રિયાણિ અહઙ્કારે વિલીયતે ॥

અહઙ્કારોઽથ બુદ્ધૌ તુ બુદ્ધિરવ્યક્તસઞ્જ્ઞકે ।
અવ્યક્તં ન ક્વચિલ્લીનં પ્રતિસઞ્ચર ઇતિ સ્મૃતઃ ॥

## અધ્યાત્મમધિભૂતમધિદૈવતં ચ ॥ ૭ ॥

બુદ્ધ્યાહઙ્કારમનસી શ્રોત્રં ત્વક્ ચક્ષુષી તથા ।
જિહ્વા ઘ્રાણં પાદપાયૂપસ્થમધ્યાત્મસઞ્જ્ઞિતમ્ ॥

યત્તુ મોક્ષધર્મે
આદૌ મન અહઙ્કારાત્ જાયતે વૃત્તયસ્ચતાઃ ॥

શબ્દરાગાત્ શ્રોત્રમસ્ય જાયતે ભાવિતાત્મનઃ ।

રૂપરાગાત્ તથા ચક્ષુર્ઘ્રાણં ગન્ધજિઘૃક્ષયા ॥

ઇત્યાદિનેન્દ્રિયાણાં મનોવૃત્તિરાગાદિકાર્યત્વં તદ્ભેદાન્તરીત્યૈવેતિ મન્તવ્યમ્ ।
અધિભૂતમ્ ।
યથાક્રમેણ બોદ્ધવ્યમભિમન્તવ્યમેવ ચ ।
સઙ્કલ્પિતવ્યં શ્રોતવ્યં સ્પ્રષ્ટવ્યં દ્રષ્ટવ્યમેવ ચ ॥

રસયિતવ્યં ઘ્રાતવ્યં ગન્તવ્યમુત્સ્રષ્ટવ્યં ચ ।
આનન્દયિતવ્યમિત્યેવમધિભૂતં પ્રકીર્તિતમ્ ॥

અધિદૈવતં ચ ।
બ્રહ્મા રુદ્રશ્ચન્દ્રમાશ્ચ આકાશો વાયુરેવ ચ ।
સૂર્યો વરુણ ઇન્દ્રશ્ચ વિષ્ણુમિત્રં તથૈવ ચ ॥

અનેનૈવ ક્રમેણેદં સમ્પ્રોક્તમધિદૈવતમ્ ।
ચત્વારિ યો વેદયતે યથા ચ-
ક્ષુષા સ્વરૂપાણ્યધિદૈવતં વા ।
વિમુક્તયાથાગતદોષસઙ્ગો-
ગુણાંસ્તુ ભુઙ્ક્તે ન ગુણૈઃ સ યુજ્યતે ॥

## પઞ્ચાભિબુદ્ધયઃ ॥ ૮ ॥

ઇચ્છાભિર્બુદ્ધિર્વિજ્ઞેયા આભિમુખ્યેન કર્મણઃ ।
ઇદં મે કાર્યમિત્યેષોઽધ્યવસાયઃ કરોમ્યહમ્ ॥

ઇચ્છા વાઞ્છાઽથ સઙ્કલ્પો મનસઃ કર્મ ચેષ્યતે ।
એવમેતાશ્ચ પઞ્ચાભિબુદ્ધયઃ પરિકીર્તિતાઃ ॥

## પઞ્ચ કર્મયોનયઃ ॥ ૯ ॥

ધૃતિઃ શ્રદ્ધા સુખેચ્છા વિવિદિષા તદભાવકૌ ।
સામાન્યતઃ સમુદ્દિષ્ટાઃ પઞ્ચૈતે કર્મયોનયઃ ॥

વાચિ કર્મણિ સંકલ્પે પ્રતીતિર્યાભિરજ્યતે ।
તન્નિષ્ઠસ્તત્પ્રતિષ્ઠશ્ચ ધૃતેરેતદ્ધિ લક્ષણમ્ ॥

અનસૂયા બ્રહ્મચર્યં યજનં યાજનં તપઃ ।

પ્રતિગ્રહશ્ચ હોમશ્ચ શ્રદ્ધાયા લક્ષણં સ્મૃતમ્ ॥

સુખં સુખાર્થી સેવેત વિદ્યા કર્મ તપાંસિ ચ ।
પ્રાયશ્ચિત્તપરો નિત્યં સુખેયં પરિકીર્ત્તિતા ॥

વિષધૂમમૂર્છિતવદ્ વિવિદિષા ધ્યાનિનાં પ્રજ્ઞાયોનિઃ ।
એકત્વં ચ પૃથક્ત્વં ચ નિત્યં વેદમચેતનમ્ ॥

સૂક્ષ્મસત્કાર્યસંક્ષોભ્યં જ્ઞેયા વિવિદિષા હિ સા ।
કાર્યકરણક્ષમકરી વિવિદિષા પ્રાકૃતી વૃત્તિઃ ॥

ધૃતિઃ શ્રદ્ધા વિવિદિષા સુખા ચેતિ ચતુષ્ટયમ્ ।
જ્ઞેયં બન્ધો વિવિદિષા મોક્ષાય પરિકલ્પિતા ।
કર્મયોનિસ્વરૂપોઽયં વિશિષ્ય પરિકીર્ત્તિતઃ ॥

## પઞ્ચ વાયવઃ ॥ ૧૦ ॥

પ્રાણોઽપાનઃ સમાનશ્ચ ઉદાનો વ્યાન એવ ચ ।
ઇત્યેતે વાયવઃ પઞ્ચ શરીરેષુ શરીરિણામ્ ॥

મુખનાસાધિચારી યઃ પ્રાણનાત્ પ્રાણ ઉચ્યતે ।
નાભેરધિચરત્યેવોપાનયેઽપાન ઇષ્યતે ॥

હૃદ્યધિષ્ઠાનનયનાત્ સમાન ઇતિ કીર્તિતઃ ।
કણ્ઠાદૂર્ધ્વાવગમનાદુદાન ઇતિ ચ સ્મૃતઃ ॥

સન્ધ્યધિષ્ઠાનતો વ્યાનો વિક્ષેપણવિજૃમ્ભણાત્ ।

## પઞ્ચ કર્માત્માનઃ ॥ ૧૧ ॥

વૈકારિકાદયઃ પૂર્વં યથાક્રમમુદાહૃતાઃ ।
શુભં વાઽશુભમૂઢૌ ચ શુભમૂઢાઽશુભમૂઢકે ॥

યથાક્રમં ચ કર્ત્તારસ્તત્તત્કર્મ સમીરિતમ્ ।

## પઞ્ચપર્વા અવિદ્યા ॥ ૧૨ ॥

તમો મોહો મહામોહસ્તામિસ્રશ્ચાન્ધતામિસ્રઃ ॥

અષ્ટકૌ તૌ તમૌ મોહૌ પ્રકૃત્યષ્ટકનિષ્ઠિતૌ ।
આત્મજ્ઞાનાભિમાન્યેયં પ્રાપ્યાદ્યૈશ્વર્યમાનિતા ॥

નિર્વૃત્તે વિષયે દૃષ્ટે પઞ્ચાનુશ્રવિકે તથા ।
મોહોઽહમભિમાનો યો મહામોહો દશાત્મકઃ ॥

અષ્ટૈશ્વર્યે દશવિષયે સિદ્ધતામિસ્ર ઉચ્યતે ।
વિષાદઃ સોઽન્ધતામિસ્રો મરણે પ્રતિપદ્યતે ॥

અવિદ્યા પઞ્ચપર્વૈષા ભિન્ના દ્વાષષ્ટિભેદતઃ ।

## અષ્ટાવિંશતિધાઽશક્તિઃ ॥ ૧૩ ॥

જડત્વકુષ્ટિકુબ્જત્વરૂપતા-
ઽઘ્રાણત્વમૂકત્વસુપઙ્ગુતાશ્ચ ।
કુણિર્ગુદાવર્ત્તિ ચ ષણ્ઢતા ચ
ઉન્માદ ઇત્યેષ નિરૂપિતોઽયમ્ ॥

એકાદશેન્દ્રિયવધો બાધિર્યાદિસ્વરૂપતઃ ।
બુદ્ધેર્વધઃ સપ્તદશ તુષ્ટિસિદ્ધિવિપર્યયઃ ॥

નાસ્તિ પ્રધાનમિતિ યા પ્રતિપત્તિરજમ્ભિકા ।
ન મહાનિત્યસલિલા નાયાચ્છા ચાનહંકૃતૌ ॥

ન વાઽસ્ત્યદૃષ્ટિસ્તન્માત્રપઞ્ચકં ભૂતકારણમ્ ।
સર્વમેવેદં બ્રહ્મેતિ બ્રહ્મૈવ સન્ બ્રહ્માપ્યેતિ ।
યથા વેદાન્તિનાં તદ્વત્ સાંખ્યાનામીદૃશી મતિઃ ॥

અસુતા વિષયાર્જને પ્રવૃત્તિઃ
સુતરા પરિરક્ષણે પ્રવૃત્તિઃ ।
ક્ષયદોષમપશ્યતો ધને પ્રવૃત્તિઃ
અસુનેત્રા પરિકીર્ત્યતે હિ સાંખ્યૈઃ ॥

અકુર્મરીચિકાભોગશક્તિર્હિંસાદ્યપશ્યતઃ ।
અનુત્તમ્ભામ્ભસિકા દોષભોગાદમ્ભઃ પ્રવર્ત્તનમ્ ॥

નવધા કથિતા હ્યેતે તત્ર તુષ્ટિર્વિપર્યયાઃ ।
કથ્યન્તે સિદ્ધયો હ્યષ્ટૌ તેઽમી સિદ્ધિવિપર્યયાઃ ॥

નાનાત્વમૂહમાનસ્ય સિદ્ધમેકમતારકમ્ ।
વિપરીતગ્રહઃ શબ્દશ્રવણાદસુતારકમ્ ॥

નાનાત્વજ્ઞો મુક્ત ઇતિ શ્રુત્વૈકજ્ઞો ન મુક્તિભાક્ ।
અતારયન્તમજ્ઞાનાસદચ્છાસ્ત્રનિવેશતઃ ।
દુઃખિતસ્યાપ્યનુદ્વેગાદપ્રમોદા હિ સંસૃતૌ ॥

અપ્રમુદં તદજ્ઞાનપ્રમુદિતમપ્રમોદમાનં વા ।
અસમ્યગ્વચનાદપ્યુપરોધેન વા ગુરૌ ॥

અભાગ્યસ્ય ન સિદ્ધિઃ સ્યાત્ જ્ઞાને તત્ સમુદીરિતમ્ ।
સ્નિગ્ધસંસર્ગતો જ્ઞાનોત્તરાજ્ઞાનમરમ્યકમ્ ॥

વ્યાખ્યાતાઃ પૂર્વરીત્યાષ્ટાવેતે સિદ્ધિવિપર્યયાઃ ।
અષ્ટાવિંશતિધાઽશક્તિર્વ્યાખ્યાતોભયયોગતઃ ॥

## નવધા તુષ્ટિઃ ॥ ૧૪ ॥

પ્રકૃતૌ પરમાત્મત્વં પ્રતિપદ્યૈવ તુષ્ટિભાક્ ॥

માધ્યસ્થ્યમવલમ્બેત અમ્ભઃ સા તુષ્ટિરુચ્યતે ।
બુદ્ધૌ ચ પરમાત્મત્વે તુષ્ટિઃ સા સલિલા સ્મૃતા ॥

અહંકારે યદા સા સ્યાદાયાચ્છા ઇતિ શબ્દિતા ।
તન્માત્રેષુ યદા સા સ્યાત્ તુષ્ટિર્દૃષ્ટિર્નિગદ્યતે ॥

આધ્યાત્મિકાશ્ચતસ્રસ્તુ તુષ્ટયઃ પ્રભવન્તિ હિ ।
મોક્ષસ્તાસ્વપિ નાસ્ત્યેવ તત્ત્વજ્ઞાનાદ્યથોદિતા ॥

અર્થાનામર્જને દુઃખમર્જિતાનાં ચ રક્ષણે ।
ત્યાગે દુઃખં ક્ષયે દુઃખં ધિગર્થં દુઃખભાજનમ્ ॥ ઇતિ
દોષદર્શનસન્તુષ્ટઃ પરબ્રહ્મૈવ મોક્ષભાક્ ।
સુતેયં પઞ્ચમી તુષ્ટિસ્તત્ત્વજ્ઞાનાદ્યભાવતઃ ॥

રક્ષણે સુતરા ષષ્ઠી સપ્તમી ક્ષયદર્શનાત્ ।
સુનેત્રા સઙ્ગદોષા ચાષ્ટમી કુર્મરીચિકા ॥

અર્થે હિંસાદિદોષેણ નિવૃત્તિશ્ચ સમસ્કરી ।
તુષ્ટિસ્તુ નવમી પ્રોક્તા હ્યુત્તમામ્ભસિકા તવ ॥

## અષ્ટધા સિદ્ધિઃ ॥ ૧૫ ॥

જ્ઞાનં યદ્દૂરમુત્પન્નં તારાખ્યા પ્રથમા હિ સા ।
શબ્દમાત્રેણ ભૂતેષુ સુતારા જ્ઞાનમિષ્યતે ॥

જ્ઞાનમધ્યયનેનૈવ તારયન્તી તૃતીયકા ।
અધ્યાત્મદુઃખાપનયાત્ પ્રમોદેત્યભિધીયતે ॥

ભૌતિકક્લેશહરણાત્ પ્રમુદા સિદ્ધિરુચ્યતે ।
આધિદૈવક્લેશહરણાત્ જ્ઞાનમુત્પદ્યતે નૃણામ્ ॥

પ્રમોદમાનેત્યાખ્યાતા ષષ્ઠી સિદ્ધિઃ સ્વયં સતામ્ ।
સ્નિગ્ધસંસર્ગનાશાત્તુ રમ્યકા સપ્તમી સ્મૃતા ॥

પ્રમુદા ચાષ્ટમી સિદ્ધિઃ પરિચર્યાદિના ગુરોઃ ।
ઇત્યેતાઃ સિદ્ધયો હ્યષ્ટૌ વ્યાખ્યાતાઃ જ્ઞાનસાધિકાઃ ॥

## દશ મૂલિકાર્થાઃ ॥ ૧૬ ॥

અસ્તિત્વમેકત્વયથાર્થવત્ત્વે
પારાર્થ્યમન્યત્વમકર્તૃકત્વમ્ ।
યોગો વિયોગો બહવઃ પુમાંસઃ
સ્થિતિઃ શરીરસ્ય ચ શેષવૃત્તિઃ ॥

એષા સા દશમૂલિકાઽર્થગણના સઙ્ઘાતપારાર્થ્યતઃ
સિદ્ધા સા પુરુષાસ્તિતા પરિણતેર્ભેદસ્ય તત્કારણમ્ ।
અસ્ત્યવ્યક્તમનન્તમેકમિતિ ચ પ્રેમાવિષાદાત્મકં
નાનાપાયપરાર્થતા ત્રિગુણતોઽન્યત્વસ્ય સિદ્ધિસ્તથા ॥

વિપર્યાસાદકર્તૃત્વં યોગઃ પુરુષદર્શનાત્ ।
પ્રાપ્તે શરીરભેદે તુ ચરિતાર્થત્વદર્શનાત્ ॥

જન્માદિકરણાન્તાનાં ભેદાન્નાના હિ તે સ્મૃતાઃ ।
ચક્રભ્રમિવત્ શેષવૃત્તિઃ સિદ્ધાર્થાઃ દશ મૂલિકાઃ ॥

સમત્યા પ્રાગુપદિષ્ટાઃ પઞ્ચાશત્ પ્રત્યયા ઇમે ।
દશષષ્ટિપદાર્થૈસ્તુ ષષ્ટિતન્ત્ર ઇતીર્યતે ॥

## અનુગ્રહસર્ગઃ ॥ ૧૭ ॥

બ્રહ્માનુગ્રહમસૃજદ્રૂપતન્માત્રતઃ પૃથક્ ।
ઉત્પાદ્યાનુગ્રહધ્યાનાત્ પ્રાક્તનાધારવર્જનાત્ ॥

## ચતુર્દશવિધો ભૂતસર્ગઃ ॥ ૧૮ ॥

અષ્ટવિકલ્પં દૈવં પૈશાચં રાક્ષસં તદ્વત્ ।
ગાન્ધર્વમૈન્દ્રં બ્રાહ્મં ચ સૌમ્યં બ્રાહ્મ્યમથાષ્ટકમ્ ॥

દેવયોનય એવૈતે તિર્યગ્યોનિસ્તુ પઞ્ચધા ।
મૃગપશુપક્ષિસરીસૃપસ્થાવરમિતિ ભેદસમ્ભિના ॥

માનુષ્યકં ચૈકવિધં બ્રાહ્મણાદિચાણ્ડાલાન્તમ્ ।
પશવો ગવાદિમૂષાન્તાઃ પક્ષિણો ગરૂડાદિકાઃ ॥

મશકાન્તા મૃગાશ્ચાપિ સિંહાદિ ચ શિવાન્તિકાઃ ।
શેષાદિ અલગર્દાન્તાઃ સર્પાઃ પર્વતભૂતૃણાઃ ॥

સ્થાવરા ભૌતિકઃ સર્ગ એતત્સંસારમણ્ડલમ્ ॥

## ત્રિવિધો બન્ધઃ ॥ ૧૯ ॥

પ્રકૃતિબન્ધઃ પ્રકૃતિલયઃ પરત્વેનાભિમન્યતઃ ।
સંન્યાસિનામિન્દ્રિયેષુ લયો વૈકારિકોઽપરઃ ॥

ગૃહીણાં દક્ષિણાબન્ધો વદાન્યત્વાભિમાનિનામ્ ।
ઇત્યેષસ્ત્રિવિધો બન્ધસ્ત્રિવિધો મોક્ષ ઉચ્યતે ॥

## ત્રિવિધો મોક્ષઃ ॥ ૨૦ ॥

જ્ઞાનોદ્રેકાદુપરતેશ્ચ ધર્માધર્મક્ષયો ભવેત્ ।
ધર્માધર્મક્ષયાચ્ચાથ કૈવલ્યમિતિ ગીયતે ॥

તદુક્તમ્ ।
આદ્યો હિ મોક્ષો જ્ઞાનેન દ્વિતીયો રાગસંક્ષયાત્ ।
કૃત્સ્નક્ષયાત્ તૃતીયસ્તુ વ્યાખ્યાતં મોક્ષલક્ષણમ્ ॥

## ત્રિવિધં પ્રમાણમ્ ॥ ૨૧ ॥

દૃષ્ટમનુમાનમાપ્તવચનં ચૈતત્ પ્રમાણકમ્ ।
પઞ્ચેન્દ્રિયાણિ પ્રત્યક્ષં વૃષ્ટિર્મેઘોદયેન તુ ॥

અનુમાનમિન્દ્રો દેવાનાં રાજાશબ્દઃ પ્રમાપકઃ ॥

આગમેઽપિ,
સ્વકર્મભિર્વિનિર્મુક્તો રાગદ્વેષવિવર્જિતઃ ॥

જ્ઞાનવાન્ શીલસમ્પન્નઃ સોઽપિ જ્ઞેયશ્ચ તાદૃશઃ ॥

## ત્રિવિધં દુઃખમ્ ॥ ૨૨ ॥

દુઃખં તુ ત્રિવિધં પ્રોક્તમધ્યાત્મમધિભૂતકમ્ ।
આધિદૈવં ચ તત્રાપિ પ્રથમં દ્વિવિધં સ્મૃતમ્ ॥

શારીરં માનસં ચેતિ વાતકામાદિદોષજમ્ ।
ભૂતેભ્યો માનુષાદિભ્યો જાતં સ્યાદાધિભૌતિકમ્ ॥

દેવેભ્યઃ શીતવાતાદિભવં સ્યાદાધિદૈવિકમ્ ।
એતત્ સમાસતઃ પ્રોક્તા સૂત્રવ્યાખ્યા યથામતિ ॥

પ્રક્રિયાં ચ પ્રવક્ષ્યામિ પૌરાણિકહિતાય વૈ ॥

## એતત્ પરમ્પરયા યાથાતથ્યમ્ ॥ ૨૩ ॥

## એતત્ સર્વં જ્ઞાત્વા કૃતકૃત્યઃ સ્યાત્ ॥ ૨૪ ॥

## ન પુનસ્ત્રિવિધેન દુઃખેનાભિભૂયતે ॥ ૨૫ ॥

મહાન્ અહંકારઃ પઞ્ચ તન્માત્રાણિ અવ્યક્તસંજ્ઞાનિ ભવન્તિ મહચ્છબ્દેન

હૈરણ્યગર્ભો બુદ્ધિરુચ્યતે । પ્રધાનં મૂલમવ્યક્તસંજ્ઞમ્ । જ્ઞઃ પુરુષઃ । એતાનિ પઞ્ચવિંશતિતત્ત્વાનિ । તત્ર પ્રધાનં કારણમેવ ન કાર્યમ્ । મહદાદયઃ સપ્ત પૂર્વપૂર્વસ્ય કાર્યાણિ ઉત્તરોત્તરસ્ય કારણાનિ । ઇન્દ્રિયાણ્યેકાદશ પઞ્ચ મહાભૂતાનિ કાર્યાણ્યેવ ન કારણાનિ । પુરુષસ્તુ ન કાર્યં ન વા કારણમ્ । તદુક્તમ્ મૂલપ્રકૃતિરિત્યાદિ । મહાન્ અહંકારઃ પઞ્ચ તન્માત્રાણિ સપ્ત પ્રકૃતિવિકૃતયઃ । પ્રધાનાદ્ બુદ્ધિર્જાયત ઇતિ પ્રધાનવિકારઃ સૈવાહઙ્કારં જનયતીતિ પ્રકૃતિઃ અહઙ્કારોઽપિ બુદ્ધેર્જાયત ઇતિ વિકૃતિઃ સોઽપિ એકાદશેન્દ્રિયાણિ પઞ્ચ તન્માત્રાણિ જનયતીતિ પ્રકૃતિઃ ॥

તત્ર શબ્દતનમાત્રમહંકારાજ્જાયત ઇતિ વિકૃતિસ્તસ્માદાકાશં જાયત ઇતિ શબ્દતન્માત્રં પ્રકૃતિઃ । તથા સ્પર્શતન્માત્રમહંકારાજ્જાયત ઇતિ વિકૃતિઃ તદેવ વાયું જનયતીતિ પ્રકૃતિઃ । એવં રૂપતન્માત્રમહંકારાજ્જાયત ઇતિ વિકૃતિઃ તદેવ તેજો જનયતીતિ પ્રકૃતિઃ । રસતન્માત્રમહઙ્કારાજ્જાયત ઇતિ વિકૃતિસ્તદેવામ્ભો જનયતીતિ પ્રકૃતિઃ । તથા ગન્ધતન્માત્રમહંકારાજ્જાયત ઇતિ વિકૃતિઃ તદેવાવનિં જનયતીતિ પ્રકૃતિઃ ॥

એતાનિ પઞ્ચ તન્માત્રાણિ સૂક્ષ્મભૂતાનિ સ્થૂલભૂતાનાં કારણાનિ ષોડશકશ્ચ વિકારઃ । પઞ્ચ બુદ્ધીન્દ્રિયાણિ પઞ્ચ કર્મેન્દ્રિયાણિ એકાદશં મનઃ પઞ્ચ મહાભૂતાનિ એષ ષોડશકો ગણો વિકાર એવ ન પ્રકૃતિઃ । પુરુષસ્તુ નોભયમિત્યર્થઃ ॥

પ્રત્યક્ષાનુમાનશબ્દરૂપં ત્રિવિધં પ્રમાણમ્ । તત્ર પ્રત્યક્ષં તાવત્ શ્રોત્રાદિપઞ્ચકં લોકોચિતશબ્દાદિગુણગ્રાહકમ્ । અનુમાનં ચાપ્રત્યક્ષાર્થગ્રાહકં ધૂમાદિ । શબ્દસ્તાવત્ ત્રિવિધો ભવતિ વાગિન્દ્રિયવિષયઃ શ્રોત્રવિષયો બુદ્ધિમાત્રવિષયશ્ચ । તેષુ કણ્ઠતાલ્વાદિસ્થલાવચ્છિન્નઃ શબ્દો વાગીન્દ્રિયવિષયઃ તત્કાર્યત્વાત્ વાગિન્દ્રિયવ્યવહિતશ્રોત્રસ્થશ્ચ શબ્દતઃ શબ્દઃ શ્રોત્રસ્ય વિષયસ્તદ્ગ્રાહ્યત્વાત્ । ઘટ ઇત્યાદિપદાનિ તુ બુદ્ધિમાત્રસ્ય વિષયઃ વક્ષ્યમાણયુક્ત્યા બુદ્ધિમાત્રગ્રાહ્યત્વાત્ ॥

તાનિ પદાન્યેવાર્થસ્ય કરણત્વાત્ સ્ફોટ ઇત્યુચ્યતે । તદ્ધિ પદં વાગિન્દ્રિયોચ્ચાર્યપ્રત્યેકવર્ણેભ્યોઽતિરિક્તં વર્ણાનામાશુતરવિનાશિતયા

મેલનાભાવેનૈકં પદમિતિ વ્યવહારગોચરત્વાસમ્ભવાત્
અર્થસ્મારકત્વાસમ્ભવાચ્ચ । અસ્ય ચ સ્ફોટસ્ય કારણમેકઃ પ્રયત્નવિશેષઃ
પ્રયત્નભેદેનોચ્ચારણે સતિ એકપદવ્યવહારાભાવાદર્થાપ્રત્યયાચ્ચ
તસ્ય ચ સ્ફોટસ્ય વ્યઞ્જક આનુપૂર્વીવિશિષ્ટતયા અન્ત્યવર્ણપ્રત્યયઃ
અતશ્ચ બુદ્ધેરેવ સ્ફોટગ્રાહકત્વમ્ આનુપૂર્વ્યા બુદ્ધ્યૈવ
ગ્રહણસમ્ભવેન સામાનાધિકરણ્યપ્રત્યાસત્ત્યૈવાનુપૂર્વીપ્રત્યયસ્ય
સ્ફોટાખ્યપદાભિવ્યક્તિહેતુત્વે લાઘવાત્ । અત એવ સ્ફોટઃ શ્રોત્રેણ ગ્રહીતું
ન શક્યતે ઘોત્તરટત્વાદિરરૂપિણ્યા આનુપૂર્વ્યાઃ શ્રોત્રેણ ગ્રહણાસમ્ભવાત્
આશુતરવિનાશિતયા વર્ણાનાં મેલનાસમ્ભવાત્ પૂર્વપૂર્વવર્ણસંસ્કારાણાં
તત્સ્મૃતીનાં ચાન્તઃકરણનિષ્ઠાનામન્તઃકરણસહકારિત્વસ્યૈવૌચિત્યાદિતિ ।
સ્યાદેતત્ સ્ફોટવ્યઞ્જકસ્યાનુપૂર્વીવિશિષ્ટચરમવર્ણસ્યૈવ
પદત્વમર્થપ્રત્યાયકત્વં વાઽસ્તુ અલં સ્ફોટેન તદ્ધેતોરેવ તદસ્ત્વિતિ
ન્યાયાત્ । એતદેવ સાંખ્યસૂત્રેણોક્તં પ્રતીત્યપ્રતીતિભ્યાં ન સ્ફોટાત્મકઃ શબ્દ
ઇતિ । એકત્વપ્રત્યયોઽપ્યાનુપૂર્વીવિશિષ્ટચરમવર્ણસ્યૈકત્વેનોપપદ્યતે ॥

અત્રોચ્યતે । એવં સત્યવયવ્યુચ્છેદપ્રસઙ્ગઃ ।
અસમવાયિકારણસંયોગવિશેષાવચ્છિન્નાનામવયવાનામેવ
જલાદ્યાહરણહેતુત્વકલ્પનાયાં લાઘવાત્ તદ્ધેતોરેવ તદસ્ત્વિતિ ન્યાયસામ્યાત્
એકો ઘટ ઇત્યાદિપ્રત્યયાનામપ્યેકં વનમિત્યાદિપ્રત્યયવદુપપત્તેઃ ।
અથ પરમાણૂનાં તત્સંયોગાનાં ચાતીન્દ્રિયતયા તદ્રૂપત્વેઽવયવિનઃ
પ્રત્યક્ષાનુપપત્તિરિત્યાદિકમવયવિસાધકમિતિ ચેત્ તુલ્યં સ્ફોટેઽપિ
આનુપૂર્વ્યાઃ ક્ષણાદ્યતીન્દ્રિયઘટિતતયા આનુપૂર્વીવિશિષ્ટચરમવર્ણાત્મકત્વે
પદસ્ય પ્રત્યક્ષાનુપપત્તિરિત્યાદિકં સ્ફોટસાધકમિતિ । અપિ ચ
સ્ફોટશબ્દોઽસ્માભિઃ શ્રુતિપ્રમાણેનૈવ સ્વર્ગાદિવત્ કલ્પ્યતે ઇત્યતસ્તત્ર
લૌકિકપ્રમાણાભાવેઽપિ ન ક્ષતિઃ ॥

તથાહિ પ્રણવસ્યાકારોકારમકારરૂપમાત્રાત્રયં બ્રહ્માદિદેવતાત્રયાત્મકમુક્ત્વા
પ્રણવં દેવતાત્રયાતિરિક્તપરબ્રહ્માત્મકં ચતુર્થમાત્રાં શ્રુતય
આમનન્તિ । સા ચતુર્થી માત્રા વર્ણત્રયાદતિરિક્તઃ સ્ફોટ એવ સમ્ભવતિ સૈવ
ચાર્દ્ધમાત્રેત્યુચ્યતે રાશિવદવિભક્તયોર્વર્ણપદયોર્વર્ણા એકમર્દ્ધં પદં
ચાન્યદર્દ્ધમિત્યુપપદ્યતે । યથા ચાવયવેભ્યો વિવિચ્યાવયવી ન વ્યવહાર્યો
ભવતિ એવમેવ પ્રત્યેકવર્ણેભ્યો વિવિચ્ય પદમુચ્ચારયિતું ન શક્યત
ઇતિ । અતઃ સ્મર્યતે "અર્દ્ધમાત્રા સ્થિતા નિત્યા યાનુચ્ચાર્યા વિશેષત" ઇતિ ॥

નનુ સ્યાદેવમર્દ્ધમાત્રોપપત્તિઃ । નાદબિન્દોસ્તુ કિં સ્વરૂપમ્ ઉચ્યતે । પ્રણવે ઉચ્ચાર્યમાણે શઙ્ખનાદવેણુનાદાદિવદ્યઃ સ્વરવિશેષો ભવતિ સ નાદઃ યા ચ નાદસ્યોપરમાવસ્થા અતિસૂક્ષ્મા સા શૂન્યતુલ્યતયા બિન્દુરુચ્યત ઇતિ । તસ્માદવયવેભ્યોઽવયવીવ વર્ણેભ્યોઽતિરિક્તં પદં તદેવ સ્ફોટ ઇતિ સિદ્ધમ્ । નન્વેવં વાક્યમપિ સ્ફોટઃ સ્યાદિતિ ચેન્ન બાધકાભાવે સતીષ્યતામિતિ દિક્ ॥

શબ્દસ્તાવત્ યથોદેષ્ટપુરુષવાક્યલક્ષણઃ ઇન્દ્રો દેવરાડિત્યાદિઃ । અર્થાપત્તિસમ્ભવાભાવૈતિહ્યપ્રતિભોપમાનાનિ યદિ પ્રમાણાનિ તર્હ્યત્રૈવાન્તર્ભાવ્યાનિ ન પૃથક્ । પ્રકૃતિપુરુષૌ વિદ્યમાનાવપિ નોપલભ્યેતે સૂક્ષ્મત્વાત્ યથાકાશે ધૂમોષ્મનીહારપરમાણવઃ સન્તોઽપિ નોપલભ્યન્તે । મહદાદિકાર્યદર્શનેન તત્કારણમિવ પ્રધાનમનુમીયતે । ત્રિગુણપ્રધાનજન્યં મહદાદિકાર્યં કિઞ્ચિત્પ્રકૃતિસદૃશં કિઞ્ચિદ્વિકૃતિસદૃશં લોકે ઉભયથા પુત્રરૂપકાર્યદર્શનાત્ । તચ્ચ કાર્યં સત્ નાસત્ ન સદસત્ નાનિર્વચનીયમ્ અત્યન્તાસત્ત્વે સિકતાભ્યોઽપિ તૈલમુત્પદ્યેત । અન્યૌ ચ પક્ષૌ વિરુદ્ધાવેવ અવ્યક્તસઞ્જ્ઞં પ્રધાનં સ્વતન્ત્રં વ્યાપિ નિત્યં ચ વ્યક્તસઞ્જ્ઞં કાર્યમસ્વતન્ત્રમવ્યાપિ અનિત્યં ચ । પુરુષઃ સ્વતન્ત્રો વ્યાપી નિત્યશ્ચ । ત્રયાણાં લોકાનાં કારણં પ્રધાનં તચ્ચૈકં લાઘવાત્ । પ્રલયકાલે મહદાદિકાર્યં પ્રધાને લીયતે । તચ્ચ પ્રધાનં સત્ત્વરજસ્તમોમયમ્ । ગુણત્રયસામ્યાવસ્થા પ્રકૃતિઃ । પ્રધાનમચેતનં પુરુષસ્તુ ચેતનઃ । વ્યક્તપ્રધાનવિલક્ષણઃ શુદ્ધો ગુણરહિતઃ । કાર્યસ્ય સુખદુઃખમોહજનકત્વેન તત્ર કારણીભૂતાનિ સત્ત્વરજસ્તમાંસિ અનુમેયાનિ । દૃષ્ટં ચ યથાક્રમં ભર્તૃસપત્નીવિટેષુ સુખદુઃખમોહજનકત્વં કામિન્યાઃ । ત્રિગુણમયેઽપિ કાર્યે યદા સત્ત્વમુદ્રિક્તં ભવતિ જનાદૃષ્ટાત્ તદા રજસ્તમસી અભિભૂય સ્વકાર્યં સુખં જનયતિ । એવં યદા રજ ઉદ્રિક્તં ભવતિ તદા સત્ત્વતમસી અભિભૂય સ્વકાર્યં જનયતિ દુઃખમ્ । એવં યદા તમ ઉદ્રિક્તં ભવતિ તદા સત્ત્વરજસી અભિભૂય સ્વકાર્યં મોહં જનયતિ ॥

દુઃખં ત્રિવિધમ્ આધ્યાત્મિકાધિભૌતિકાધિદૈવિકભેદાત્ । તથાહિ તત્ર આધ્યાત્મિકં દ્વિરૂપં શારીરં માનસં ચેતિ । શારીરં તાવત્ વાતપિત્તશ્લેષ્મવિપર્યયકૃતં જ્વરાતીસારાદિ । માનસં તુ પ્રિયવિયોગાપ્રિયસંયોગાદિજમ્ । આધિભૌતિકં તુ ચતુર્દ્ધાભૂતગ્રામનિમિત્તં પશુપક્ષિમૃગમનુષ્યસરીસૃપદંશયૂકામત્કુણસ્થાવરેભ્યો

જરાયુજાણ્ડજસ્વેદજોદ્ભિજ્જેભ્યો જાયતે । દિવઃ પ્રભવતિ તદ્દૈવં તદધિકૃત્ય યજ્જાયતે તદાધિદૈવિકં શીતોષ્ણવાતવર્ષાશનિપાતજમ્ । સમુદિતતન્તવઃ પટમિવ ગુણસમુદાયાત્મકં પ્રધાનમ્ મહદાદિકાર્યં જનયતિ । એકરસમપિ યથા આકાશસલિલં વાપ્યાદૌ પતિતં સત્ વાપ્યાદિસંશ્લેષાત્ રસાન્તરમાપદ્યતે તથા એકરૂપાદપિ પ્રધાનાદ્દેવાદયઃ ક્રમેણ સુખિનો દુઃખિનો અત્યન્તમૂઢાશ્ચ ભવન્તિ । તથા સત્ત્વૌત્કટ્યાદ્રજસ્તમસોરૌદાસીન્યાદ્દેવાઃ અત્યન્તં સુખિનઃ । રજસ ઔત્કટ્યાત્ સત્ત્વતમસોરૌદાસીન્યાન્મનુષ્યાઃ અત્યન્તં દુઃખિનઃ । તમસ ઔત્કટ્યાત્ સત્ત્વરજસોરૌદાસીન્યાત્તિર્યઞ્ચઃ અત્યન્તં મૂઢાઃ । મહદાદિસઙ્ઘાતઃ ભોક્તૃસાપેક્ષઃ ભોગ્યત્વાત્ પર્યઙ્કવત્ । મહદાદિસઙ્ઘઃ પરાધીનઃ અચેતનત્વાત્ માલાવત્ । એવં પુરુષોઽનુમીયતે । સ ચ નાના જન્મમરણકરણાનાં પ્રત્યેકં ભેદાત્ । અયમર્થઃ । એકસ્ય મરણે સર્વે મ્રિયેરન્ યદ્યેક એવ આત્મા સ્યાત્ એકસ્ય ચ જન્મનિ સર્વે જાયેરન્ એકસ્ય કરણવૈકલ્યે સર્વે કરણવૈકલ્યવન્તઃ સ્યુઃ । ન ચૈવં દૃશ્યતે તસ્માન્નાના । પઞ્ચવિંશતિતત્ત્વગોચરસમ્યગ્જ્ઞાનાત્ પુરુષસ્ય કૈવલ્યં ભવતિ । તચ્ચાન્યત્વં પ્રધાનાદિભેદ ઇતિ યાવત્ । અવિવેકાત્ સંસારઃ વિવેકાત્ કૈવલ્યમ્ । અર્થતઃ અખ્યાતિવાદાઙ્ગીકારઃ । અત એવ ઇદં રજતમિતિ જ્ઞાનં ન ભ્રમઃ કિંતુ સ્વરૂપતઃ અર્થતશ્ચ અવિવિક્તં જ્ઞાનદ્વયમ્ । યસ્ય યાદૃશમિદં રજતમિતિ રજતજ્ઞાનવિષયીભૂતં તસ્ય તાદૃશમેવ જગદિતિ નિર્ણયઃ ॥

અત એવ વસ્તુતસ્તાત્ત્વિકોઽન્યથાભાવઃ પરિણામ ઇત્યેવ લક્ષણલક્ષિતઃ પરિણામોઽઙ્ગાકૃતઃ સ ચ પુરુષઃ પ્રતિશરીરં નાનેત્યત્રાદિ સ્મ અવિકારિત્વાત્ । વસ્તુતોઽકર્ત્તા મુક્તવત્ સાક્ષિવદુદાસીનઃ । સત્ત્વરજસ્તમાંસિ કર્તૃણિ કર્માણ્યપિ ભવન્તિ । અકર્ત્તાઽપિ પુરુષઃ કર્ત્તેવ વ્યવહ્રિયતે । અચોરશ્ચોરૈઃ સહ ધૃતશ્ચોર એવ । ગુણાભેદાત્ પ્રકૃતિઃ કર્ત્રી ન પુરુષઃ । દર્શનશક્તિમતઃ ક્રિયાશક્તિરહિતસ્ય પુરુષસ્ય પ્રધાનેન સહ સંયોગઃ મહદાદિભૂતપર્યન્તં પ્રધાનં દ્રષ્ટુમ્ । દર્શનશક્તિરહિતસ્ય ક્રિયાશક્તિમતઃ પ્રધાનસ્યાપિ પુરુષેણ સંયોગઃ મોક્ષાર્થં પુરુષસ્ય ભિન્નત્વેન વ્યક્તાવ્યક્તપુરુષજ્ઞાને જાતે પ્રધાનસ્ય મોક્ષો ભવતિ । નિત્યસુખોપલબ્ધિર્મોક્ષ ઇતિ ચેદુપલબ્ધેરપિ નિત્યાનિત્યવિવેકગ્રસ્તત્વાદસારમ્ । ન ચ

નિત્યસુખગોચરસ્યાવિદ્યાદિયત્કિઞ્ચિદાવરણભઙ્ગ એવ પુરુષાર્થો વાચ્યઃ
સુખાનુભવસ્યૈવ પુરુષાર્થત્વાચ્ચૈતન્યનિત્યત્વેનાવરણસ્યાપિ
અસમ્ભવાચ્ચ । મોક્ષે પરમાનન્દશ્રુતિસ્મૃતયસ્તુ
મોક્ષશાસ્ત્રપરિભાષામાત્રા ।
દુઃખમેવાસ્તિ ન સુખં યસ્માત્ તદુપલભ્યતે ।
દુઃખાર્તસ્ય પ્રતીકારે સુખસઞ્જ્ઞા વિધીયતે ॥

દુઃખં કામસુખાપેક્ષા સુખં દુઃખાત્યયઃ સ્મૃતઃ ॥

ઇત્યાદિસ્મૃતિભિર્દુઃખનિવૃત્તિરેવ સુખત્વેન પરિભાષિતા ।
સાંખ્યસૂત્રમપિ દુઃખનિવૃત્તિર્ગૌણ ઇતિ વિમુક્તિપ્રશંસા મન્દાનામિતિ ચ ।
આનન્દાવાપ્તિસ્તુ ગૌણમોક્ષો બ્રહ્મલોકે ભવતિ ઇતિ પશ્ચાત્ કૃતાર્થયોઃ
પ્રધાનપુરુષયોર્વિયોગો ભવતિ અન્ધપઙ્ગુસંયોગવત્ । તથાહિ એકઃ
પઙ્ગુરપરશ્ચાન્ધઃ દ્વાવપ્યેતૌ દુષ્ટે પથિ ગચ્છન્તૌ મહતા સાર્થેન
સહ દૈવાદ્બન્ધુભિઃ પરિત્યક્તૌ યથાયોગં ગમનશક્તિદર્શનશક્તિરહિતૌ
દર્શનાર્થં ગમનાર્થં ચ સંયુક્તૌ ભવતઃ । તથા ચાન્ધેન પઙ્ગુઃ
સ્કન્ધમારોપિતસ્તદ્દર્શિતમાર્ગેણાન્ધો યાતિ પઙ્ગુશ્ચાન્ધસ્કન્ધારૂઢઃ
સન્ યાતિ । પશ્ચાત્ સ્વસ્વદેશપ્રાપ્ત્યનન્તરં કૃતાર્થૌ સન્તૌ
વિયુક્તૌ ભવતઃ । તથા ચ પ્રધાનં પુરુષસ્ય મોક્ષં કૃત્વા
નિવર્ત્તતે । પુરુષો ન પ્રવર્ત્તતે નાપિ નિવર્ત્તતે । દ્રષ્ટા ભોક્તા
ચ પુરુષઃ । ભોગશ્ચિદવસાનતા લક્ષણઃ । ન ક્રિયાવેશાત્મા સ ચ
પુરુષઃ અનાદ્યવિવેકાત્ સંસરતિ । સચ્છાસ્ત્રશ્રવણેન ગુર્વનુગ્રહેણ ચ
નિર્વિચિકિત્સો વિવેકજ્ઞાને જાતે મુચ્યતે । પ્રકૃતિપુરુષસંયોગાત્ સંસારઃ
સઞ્જાયતે । સ્ત્રીપુરુષસંયોગાદપત્યમિવ પ્રકૃતેર્મહત્તત્વં જાયતે ।
મહત્તત્વાદહઙ્કારો જાયતે । સ ચ ત્રિવિધઃ વૈકારિકો ભૂતાદિસ્તૈજસશ્ચ ।
યો હિ વૈકરિકઃ સ એવ સાત્ત્વિકઃ યો ભૂતાદિઃ સ એવ તામસઃ । યો
હિ તૈજસઃ સ એવ રાજસઃ તત્ર વૈકારિકાદહઙ્કારાદેકાદશેન્દ્રિયાણિ
તદભિમાનિન્યો દેવતાશ્ચ જાયન્તે । ભૂતાદેશ્ચાહંકારાત્ તન્માત્રાણિ
જાયન્તે તૈજસાદહંકારાદેકાદશેન્દ્રિયગણસ્તન્માત્રપઞ્ચકં ચ જાયતે ।
એતદ્ગણદ્વયસ્ય યથાસંખ્યં વૈકારિકાદ્ભૂતાદેશ્ચાહંકારાજ્જાતત્વાત્ કથં
પુનરુત્પત્તિરુચ્યત ઇતિ ચેચ્છૃણુ ।
યદા રજસ્તમસી અભિભૂય સત્ત્વગુણ ઉત્કટો વૈકરિકસઞ્જ્ઞાં
લભમાનોઽહંકારોઽપ્રવૃત્તિધર્મા તૈજસાહંકારં

સહાયીકૃત્ય પ્રવૃત્તિધર્માણ્યેકાદશેન્દ્રિયાણિ જનયતિ તદા તાનિ સ્વસાહાય્યચ્છલમધિગમ્ય તૈજસસ્વરૂપેણાપિ કૃતાનીત્યુચ્યતે । યદા ચ સત્ત્વરજસી અભિભૂય તમોગુણોત્કટો ભૂતાદિસ્તૈજસાહંકારસ્ય રૂપં સહાયીકૃત્ય તન્માત્રપઞ્ચકં પ્રવૃત્તિધર્મકં કરોતિ તદા તત્તન્માત્રપઞ્ચકં સ્વસાહાય્યેનૈવ તૈજસેનાપિ કૃતમિત્યુચ્યતે તસ્માત્ પ્રવૃત્તિધર્મકાત્ તત્તન્માત્રપઞ્ચકાદ્ ભૂતપઞ્ચકમુત્પદ્યતે । એષ પરિણામક્રમઃ । વૈકારિકાદેકાદશેન્દ્રિયાણિ ભૂતાદેસ્તન્માત્રપઞ્ચકમિતિ ॥

અયમર્થઃ । વૈકારિકસ્ય ભૂતાદેશ્ચ સ્વસ્વપ્રવૃત્તિધર્મકકાર્યદ્વયસ્ય યથાસંખ્યં જનને તૈજસાહંકારસ્ય સાહાય્યમ્ । તૈજસાહંકારસ્ય સાહાય્યકરણાદેવ એતદ્ગણદ્વયલક્ષણકકાર્યસ્ય પ્રવૃત્તિધર્મકત્વમ્ । બુદ્ધિજનકાનીન્દ્રિયાણિ બુદ્ધીન્દ્રિયાણિ તાનિ ચક્ષુઃશ્રોત્રઘ્રાણરસનત્વગિન્દ્રિયાણિ । તેષાં ચ વિષયાઃ રૂપશબ્દગન્ધરસસ્પર્શાઃ । કર્મ કુર્વન્તીતિ કર્મેન્દ્રિયાણિ તાનિ ચ વાક્પાણિપાદપાયૂપસ્થાનિ । તેષાં ચ વિષયાઃ વાગ્વદનાદાનગમનોત્સર્ગાનન્દાઃ । મનો બુદ્ધીન્દ્રિયં કર્મેન્દ્રિયં ચ યતો બુદ્ધીન્દ્રિયાણાં વૃત્તિં સંકલ્પયતિ કર્મેન્દ્રિયાણાં ચ અત ઉભયાત્મકં મનઃ । મનોઽપિ વિભુ ધર્માધર્મવાસનાશ્રયતઃ પ્રતિપુરુષમન્તઃકરણં નિત્યમાકાશવત્ । ન ચ પ્રકૃતિધર્મા એવ સન્ત્વદૃષ્ટાદય ઇતિ વાચ્યમ્  અન્યનિષ્ઠાદૃષ્ટાદિભિરન્યત્ર સુખદુઃખાદ્યુત્પાદેઽતિપ્રસઙ્ગાત્ । તચ્ચ નાણુ સંભવતિ યોગિનાં સર્વાવચ્છેદેન એકદાઽખિલસાક્ષાત્કારાસમ્ભવાત્ । ન ચ યોગિનાં યોગજધર્મ એવ પ્રત્યાસત્તિઃ સ્યાત્ સંયોગસંયુક્તસમવાયાદિલૌકિકપ્રત્યાસત્ત્યૈવોપપત્તૌ સન્નિકર્ષાન્તરકલ્પને માનાભાવાત્ ગૌરવાચ્ચ અન્યોન્યવ્યભિચારાચ્ચ । સાક્ષાત્કારેષ્વવાન્તરજાતિકલ્પને જાતિસાઙ્કર્યાત્ અતિગૌરવાચ્ચ । યોગિમતે સર્વાર્થગ્રહણસમર્થસ્યાન્તઃકરણસ્ય તમાખ્યાવરણભઙ્ગ એવ યોગજધર્માદિભિઃ ક્રિયતે સુષુપ્તૌ તમસો વૃત્તિપ્રતિબન્ધકત્વસિદ્ધેરિતિ નાપ્યન્તઃકરણં મધ્યમપરિમાણમાત્રં સમ્ભવતિ પ્રલયે વિનાશેનાદૃષ્ટાદ્યાધારતાનુપપત્તેઃ અતઃ પરિશેષતોઽન્તઃકરણં વિભ્વેવ સિધ્યતિ તદુક્તમ્ ।

ચિત્તાકાશં ચિદાકાશમાકાશં ચ તૃતીયકમ્ ।
દ્વાભ્યાં શૂન્યતમં વિદ્ધિ ચિદાકાશં વરાનને ॥

સ્યાદેતત્ । અન્તઃકરણસ્ય વિભુત્વે
પરિચ્છિન્નવૃત્તિલાભસ્યાવરણેનોપપત્તાવપિ લોકાન્તરગમનાદિકં નોપપદ્યતે ।
અત એવ સાંખ્યસૂત્રમ્ ન વ્યાપકં મનઃ કરણત્વાદિતિ । તદ્ગતિશ્રુતેરિતિ
વેતિ કિં ચૈવં સતિ લાઘવાત્ ચૈતન્યસ્યૈવાવરણકલ્પનમુચિતં કિમર્થં
વિભ્વન્તઃકરણં પરિકલ્પ્યતે તત્ર જ્ઞાનપ્રતિબન્ધકમાવરણં કલ્પ્યતે ॥

અત્રોચ્યતે । ગતિશ્રુતિસ્તાવત્ આત્મનીવાન્તઃકરણેઽપિ
પ્રાણેન્દ્રિયાદ્યુપાધિનોપપદ્યતે કાર્યકારણરૂપેણાન્તઃકરણદ્વૈતાત્ ।
કાર્યાન્તઃકરણસ્ય સ્વતોઽપિ ગતિરુપપદ્યતે કાર્યકારણરૂપેણાન્તઃકરણદ્વૈતં
ચ સાંખ્યૈરપ્યેષ્ટવ્યમ્ કેવલકાર્યત્વેઽન્તઃકરણધર્મત્વં ધર્માદીનામિતિ
સાંખ્યસૂત્રાનુપપત્તેઃ । કેવલનિત્યત્વે ચ મહદાદ્યુત્પત્તિસૂત્રાનુપપત્તેઃ
યત્તૂક્તં ચૈતન્યસ્યૈવાવરણકલ્પનં યુક્તમિતિ તદયુક્તમ્ ।
કૂટસ્થચૈતન્યસ્ય જ્ઞાનપ્રતિબન્ધરૂપાવરણાસમ્ભવાત્ । ન
ચ ચૈતન્યસ્યાર્થસમ્બન્ધ એવ પ્રતિબિમ્બાદિરૂપે પ્રતિબન્ધકં
કલ્પનીયમિતિ વાચ્યમ્ એવમપ્યાત્મદર્શનાનુપપત્તેઃ કરણદ્વારં
વિના સ્વસ્મિન્ પ્રતિબિમ્બાદિરૂપેણ સ્વસ્વસમ્બન્ધાસમ્ભવાત્ ।
અપિ ચ ઇચ્છાકૃત્યાદ્યાધારતયાઽન્તઃકરણે સિદ્ધે
સ્વપ્નાદાવન્તર્દૃશ્યમાનઘટાદયોઽપિ તસ્યૈવ પરિણામાઃ
કલ્પ્યન્તે કાર્યકારણયોઃ સામાનાધિકરણ્યૌચિત્યાત્ । એવં ચ
ઘટાદ્યાકારપરિણતાશ્ચૈતન્યે ભાસન્તે તદવિભાગેનૈવ બાહ્યઘટાદિકં
ભાસતેઽતસ્તાદૃશપરિણામપ્રતિબન્ધકમેવાવરણં તત્રૈવ યુક્તં કિઞ્ચ
બાહ્યકરણસ્યાવરણદર્શનેનાન્તરાવરણસ્યાપિ કરણનિષ્ઠત્વં ચાનુમીયતે
આત્મનોઽનાવૃતત્વં શ્રુતિસ્મૃતિભ્યાં ચેતિ ।
નન્વન્તઃકરણસ્ય વિભુત્વે સતિ કથં કાર્યત્વં સ્યાદિતિ ચેન્ન
વિભ્વ્યા અપિ આકશપ્રકૃતેઃ કાર્યાકાશરૂપપરિચ્છિન્નપરિણામવદ્
ગુણાન્તરસમ્ભેદેનાન્તઃકરણપ્રકૃતેરપિ
પરિચ્છિન્નાન્તઃકરણરૂપપરિણામોપપત્તિઃ
શ્રુતિસ્મૃતિપ્રામાણ્યાચ્ચૈતદિષ્યત ઇતિ દિક્ ॥

મનસઃ સઙ્કલ્પો વિષયઃ । એતાન્યેકાદશ વૈકૃતાહંકારાજ્જાતાનિ
ઇત્યવાદિ સ્મૈવ બુદ્ધિપ્રતિબિમ્બિતમર્થં પુરુષ ઉપલભતે । તદુક્તં
બુદ્ધિસ્થમર્થં પુરુષશ્ચેતયતે । અહં ધર્મં કરિષ્યામીત્યધ્યવસાયો
બુદ્ધેર્લક્ષણમ્ । ધર્મો જ્ઞાનં વિરાગઃ ઐશ્વર્યમેતત્ સાત્ત્વિકબુદ્ધેઃ ।

તદ્વિપરીતમવિરાગાદિ તામસમ્ ॥

પઞ્ચવિંશતિતત્ત્વૈરેવ જગદ્વ્યાપ્તં ન ન્યૂનૈર્નાધિકૈશ્ચ
વત્સવિવૃદ્ધિનિમિત્તં ક્ષીરસ્યેવ અજ્ઞસ્યાપિ પ્રધાનસ્ય
પુરુષમોક્ષાર્થં પ્રવૃત્તિરુચિતૈવ । લિઙ્ગશરીરં તુ
બુદ્ધ્યહંકારમનોબુદ્ધીન્દ્રિયકર્મેન્દ્રિયપઞ્ચતન્માત્રાણામષ્ટાદશાનાં
સમુદાયઃ ત્રયોવિંશતિતત્ત્વમધ્યે પઞ્ચભૂતાનિ વર્જયિત્વા અહંકારં
ચ બુદ્ધૌ પ્રવેશ્ય સપ્તદશકં લિઙ્ગશરીરસઞ્જ્ઞં ભવતિ
વહ્નેરિન્ધનવદાત્મનોઽભિવ્યક્તિસ્થાનવાત્ । તચ્ચ સર્વપુરુષાણાં
સર્ગાદાવુત્પદ્ય પ્રાકૃતપ્રલયપર્યન્તં તિષ્ઠતિ તેન ચૈવેહ
લોકપરલોકયોઃ સંસરણં જીવાનાં ભવતિ । પ્રાણશ્ચ બુદ્ધેરેવ વૃત્તિભેદ
ઇત્યતો ન લિઙ્ગશરીરાત્ પૃથઙ્ નિર્દિશ્યતે તસ્ય ચ લિઙ્ગશરીરસ્ય
સૂક્ષ્માણિ પઞ્ચ ભૂતાનિ આશ્રયશ્ચિત્રાદિવદાશ્રયં વિના પરમસૂક્ષ્મસ્ય
લોકાન્તરગમનાસમ્ભવાત્ ॥

ઇદં ચ લિઙ્ગશરીરમાદૌ સ્વયંભુવ ઉપાધિભૂતમેકમેવ જાયતે તસ્યૈવ
વિરાડાખ્યવક્ષ્યમાણસ્થૂલશરીરવત્ તતશ્ચ વ્યષ્ટિજીવાનામુપાધિભૂતાનિ
વ્યષ્ટિલિઙ્ગશરીરાણિ તદંશભૂતાનિ તતો વિભજ્યન્તે । પિતુર્લિઙ્ગશરીરાત્
પુત્રલિઙ્ગશરીરવત્ । તદુક્તં સૂત્રકારેણ । વ્યક્તિભેદઃ કર્મવિશેષાદિતિ
મનુનાપ્યુક્તમ્ ।
તેષાં ત્વવયવાન્ સૂક્ષ્માન્ ષણ્ણામપ્યમિતૌજસામ્ ।
સન્નિવેશ્યાત્મમાત્રાસુ સર્વભૂતાનિ નિર્મમે ॥ ઇતિ ।
ષણ્ણામિતિ ષડિન્દ્રિયં સમસ્તલિઙ્ગશરીરોપલક્ષકમ્ તથા ચ સ્વયમ્ભૂઃ
સ્વલિઙ્ગશરીરાવયવાન્ સૂક્ષ્માનલ્પાન્ આત્મમાત્રાસુ સ્વાંશચેતનેષુ સંયોજ્ય
સર્વપ્રાણિનઃ સસર્જેત્યર્થ ઇતિ લિઙ્ગશરીરમ્ । સ્થૂલશરીરોત્પત્તિસ્તુ
દશગુણિતમહત્તત્ત્વમધ્યેઽહંકારસ્તસ્યાપિ દશગુણિતસ્ય મધ્યે
વ્યોમ્નોઽપિ દશગુણિતસ્ય મધ્યે વાયુર્વાયોરપિ દશગુણિતસ્ય મધ્યે
તેજસ્તેજસોઽપિ દશગુણિતસ્ય મધ્યે જલં જલસ્યાપિ દશગુણિતસ્ય
મધ્યે પૃથિવી સમુત્પદ્યતે સૈવ ચ સ્થૂલશરીરસ્ય બીજં તદેવ ચ
પૃથિવીરૂપં બીજમણ્ડરૂપેણ પરિણમતે તસ્યાપિ દશગુણિતાણ્ડરૂપસ્ય
પૃથિવ્યાવરણસ્ય મધ્યે ચતુર્દશભુવનાત્મકં સ્વયમ્ભુવઃ સ્થૂલશરીરં
તત્સંકલ્પાદેવોત્પદ્યતે તેનૈવ શરીરેણ સ્વયમ્ભૂર્નારાયણ ઇત્યુચ્યતે ।
તદુક્તં મનુના સ્વયમ્ભુવં પ્રકૃત્ય ।

સોઽભિધ્યાય શરીરાત્ સ્વાત્ સિસૃક્ષુર્વિવિધાઃ પ્રજાઃ ।
અપ એવ સસર્જાદૌ તાસુ વીર્યમવાસૃજત્ ॥

તદણ્ડમભવદ્ધૈમં સહસ્રાંશુસમપ્રભમ્ ।
તસ્મિન્ યજ્ઞે સ્વયં બ્રહ્મા સર્વલોકપિતામહઃ ॥

સ વૈ શરીરી પ્રથમઃ સ વૈ પુરુષ ઉચ્યતે ।
આદિકર્ત્તા સ ભૂતાનાં બ્રહ્માગ્રે સમવર્ત્તત ॥

આપો નારા ઇતિ પ્રોક્તા આપો વૈ નરસૂનવઃ ।
તા યદસ્યાયનં પૂર્વં તેન નારાયણઃ સ્મૃતઃ ॥

ઇત્યાદિનેતિ ।
તત એવ ચાદિપુરુષાત્ વ્યષ્ટિપુરુષાણાં વિભાગાદન્તે ચ તત્રૈવ લયાત્
સ એવ ચૈક આત્મેતિ શ્રુતિસ્મૃત્યોર્વ્યવહ્રિયતે અતો ન વ્યવહારપરતયા
નારાયણ એવ સર્વભૂતાનામાત્મેત્યાદિશ્રુતિસ્મૃતિવિરોધ ઇતિ । તતશ્ચ
સ નારાયણો વિરાટ્શરીરી સ્વનાભિકમલકર્ણિકાસ્થાનીયસ્ય સુમેરોરુપરિ
ચતુર્મુખાખ્યં સ્વયંભુવં સૃષ્ટ્વા તદ્વારાન્યાનપિ વ્યષ્ટિશરીરિણઃ
સ્થાવરાન્તાન્ સસર્જ તદુક્તમ્ -
તચ્છરીરસમુત્પન્નૈઃ કાર્યૈસ્તૈઃ કારણૈઃ સહ ।
ક્ષેત્રજ્ઞાઃ સમજાયન્ત ગાત્રેભ્યસ્તસ્ય ધીમતઃ ॥ ઇતિ ।
યત્તુ શેષશાયિનો નારાયણસ્ય
નાભિકમલશ્રોત્રચક્ષુરાદિભ્યશ્ચતુર્મુખસ્યાવિર્ભાવઃ
શ્રૂયતે તદ્દૈન્યન્દિનસર્ગેષ્વેવ કલ્પભેદેન મન્તવ્યમ્ ।
દૈનન્દિનપ્રલયેષ્વેવ હિ નારાયણશરીરે પ્રવિશ્યૈકીભૂય સુપ્તાનાં દેવાનાં
ચતુર્મુખાદિક્રમેણાવિર્ભાવઃ શેષશાયિનઃ સકાશાત્ ઘટતે ન ત્વાદિસર્ગેષુ
દૈનન્દિનપ્રલય એવ લીલાવિગ્રહેણ શયનાદિતિ ॥

તદેવં સંક્ષેપતશ્ચતુર્વિંશતિતત્ત્વાનિ તેષાં સૃષ્ટિક્ષયં પ્રયોજનં
ચોક્તમ્ । તત્ર યદ્યસ્માજ્જાયતે તસ્ય તદાઽઽપૂરણેનૈવ સ્થિતિઃ તતસ્તસ્ય
સંહારોઽપિ તત્રૈવ ભવતિ । તથા ચ ભારતે ।
યદ્યસ્માજ્જાયતે તત્ત્વં તચ્ચ તત્ર પ્રલીયતે ।
લીયન્તે પ્રતિલોમાનિ જાયન્તે ચોત્તરોત્તરમ્ ॥ ઇતિ ।
એતે ચ સૃષ્ટિસ્થિતિસંહારરૂપાઃ સ્થૂલા એવ પરિણામાશ્ચતુર્વિંશતિતત્ત્વાનાં
કૂટસ્થપુરુષવિવેકાય પ્રદર્શિતાઃ સૂક્ષ્મા અપ્યન્યે પ્રતિક્ષણપરિણામા

એતેષાં સ્મર્યન્તે ।
નિત્યદાહ્યઙ્ગભૂતાનિ ભવન્તિ ન ભવન્તિ ચ ।
કાલેનાલક્ષ્યવેગેન સૂક્ષ્મત્વાત્ તન્ન ગૃહ્યતે ॥ ઇતિ ।
અતસ્તુ સર્વં જડવસ્તુ પરમાર્થતઃ સર્વદૈવાસદુચ્યતે । તતશ્ચ
તસ્માદ્વિરજ્ય આત્મૈવ પરમાર્થસત્યો દુઃખભીરુભિર્દ્રષ્ટવ્યઃ તદુક્તમ્ ।
અવ્યક્તબીજપ્રભવો બુદ્ધિસ્કન્ધમયો મહાન્ ।
મહાહંકારવિટપ ઇન્દ્રિયાઙ્કુરકોટરઃ ॥

મહાભૂતપ્રશાખશ્ચ વિશેષપ્રતિશાખવાન્ ।
સદાપર્ણઃ સદાપુષ્પઃ શુભાશુભફલોદયઃ ॥

આજીવઃ સર્વભૂતાનાં બ્રહ્મવૃક્ષઃ સનાતનઃ ।
એતજ્જ્ઞાત્વા ચ તત્ત્વેન જ્ઞાનેન પરમાસિના ॥

કૃત્વા ચાક્ષરતાં પ્રાપ્ય જહાતિ મૃત્યુજન્મની ॥ ઇતિ ।
તદુક્તં -
ઇન્દ્રિયાણીન્દ્રિયાર્થાશ્ચ નોપસર્પન્ત્યતઃ ખલુ ।
હીનશ્ચ કરણૈર્દેહી ન દેહં પુનરર્હતિ ॥

તસ્માત્સર્વાત્મકાદ્રાગાજ્જાયન્તે સર્વજન્તવઃ ॥ ઇતિ ।
નરકાદૌ વિશેષરાગાભાવેઽપિ સામાન્યરાગસત્ત્વાદ્રાગસ્ય કર્મસહકારિત્વં
વિપાકારમ્ભે તદેવ સક્તઃ સહ કર્મણૈતિ લિઙ્ગં મનો યત્ર નિષક્તમસ્યેતિ
શ્રુતાવભિમાનરાગદ્વેષાદિજન્યસ્ય વિષ્યવાસનાખ્યસઙ્ગસામાન્યસ્યૈવ
જન્માદિવિપાકારમ્ભે સહકારિત્વસિદ્ધેઃ ।
યત્ર યત્ર મનો દેહી ધારયેત્ સકલં ધિયા ।
સ્નેહાદ્ દ્વેષાદ્ ગુણાદ્વાપિ યાતિ તત્તત્સરૂપતામ્ ॥ ઇતિ સ્મૃતેઃ ।
સોઽયં પ્રતિનિવૃત્તાક્ષો ગુરુદર્પણબોધિતઃ ।
સ્વતોઽન્યાં વિક્રિયાં મૌઢ્યાદસ્થિતામગ્જસૈક્ષત ॥

અથાસૌ પ્રકૃતિર્નાહમિયં હિ કલુષાત્મિકા ।
શુદ્ધબુદ્ધસ્વભાવોઽહમિતિ ત્યજતિ તાં વિદન્ ॥

એવં દેહેન્દ્રિયાદિભ્યઃ શુદ્ધત્વેનાત્મનિ સ્મૃતે ।
નિખિલા સવિકારેયં ત્યક્તપ્રાયા હિ ચર્મવત્ ॥

નન્વનાત્મન્યાત્મબુદ્ધિરૂપા યાઽવિદ્યા તસ્યાઃ
કથમાત્મવિશેષ્યકવિવેકજ્ઞાનનાશ્યત્વં

પ્રકારાદિભેદાદિતિ ચેત્ ન તાદૃશાવિદ્યાયા અનાત્મવિશેષ્યકવિવેકદ્વારેણાત્મવિશેષ્યકવિવેકનાશ્યત્વાદિતિ । યચ્ચ યોગેન નિર્વિકલ્પકમાત્મજ્ઞાનં જાયતે । તદ્વિવેકજ્ઞાનદ્વારૈવ મોક્ષકારણં ભવતિ ન તુ સાક્ષાત્ । અવિદ્યાનિવર્તકત્વાભાવાત્ અહં ગૌરઃ કર્ત્તા સુખી દુઃખીત્યાદિજ્ઞાનમેવ હ્યવિદ્યા સંસારાનર્થહેતુતયા શ્રુતિસ્મૃતિન્યાયસિદ્ધા તસ્યાશ્ચ નિવર્ત્તિકા નાહં ગૌર ઇત્યાદિરૂપા વિવેકખ્યાતિરેવ ભવતિ સમાને વિષયે ગ્રાહ્યાભાવત્વપ્રકારકગ્રાહ્યાભાવજ્ઞાનત્વેનૈવ વિરોધાત્ અન્યથા મુક્તિનિર્વિકલ્પકસ્યાપિ ઇદં રજતમિતિ જ્ઞાનવિરોધિત્વાપત્તેઃ । કિઞ્ચ યથોક્તાભાવજ્ઞાને ગ્રાહ્યજ્ઞાનવિરોધિત્વસ્યાવશ્યકતયા નિર્વિકલ્પજ્ઞાનસ્ય ભ્રમનિવર્તકત્વં ન પૃથક્ કલ્પ્યતે ગૌરવાત્ ॥

અપિ ચ અથાત આદેશો નેતિ નેતિ ન હ્યેતસ્માદિતિ નેત્યન્યત્ પરમસ્તીત્યાદિશ્રુત્યા વિવેકોપદેશાપેક્ષયોત્તમ ઉપદેશો નાસ્તીત્યુચ્યતે ॥

ક્ષેત્રક્ષેત્રજ્ઞયોરેવમન્તરં જ્ઞાનચક્ષુષા ।
ભૂતપ્રકૃતિમોક્ષં ચ યે વિદુર્યાન્તિ તે પરમ્ ॥

ઇતિ ગીતાવાક્યૈશ્ચ વિવેકજ્ઞાનસ્યૈવ મોક્ષહેતુત્વમુચ્યતેઽતો વિવેકજ્ઞાનમેવ સાક્ષાદવિદ્યાનિવૃત્ત્યા મોક્ષહેતુઃ । યોગેન કેવલત્મસાક્ષાત્કારસ્તુ યોગ્યાનુપલબ્ધિવિધયોપાધ્યાદિગતધર્માભાવમુપાધ્યાદિભેદં ચ ગ્રાહયતિ તતોઽવિદ્યાનિવૃત્તિરિતિ । એતેન સર્વભૂતેષુ સમતાજ્ઞાનમ્ આત્મનઃ સર્વાત્મકત્વાદિજ્ઞાનં ચ શ્રુતિસ્મૃત્યોર્ગીયમાનં વિવેકજ્ઞાનસ્યૈવ શેષભૂતં સર્વદર્શનેષુ મન્તવ્યમ્ । જ્ઞાનાન્તરાણાં સાક્ષાદભિમાનાનિવર્તકત્વાત્ બ્રહ્મમીમાંસાયાં ત્વયં વિશેષો યત્પરમાત્મવિવેકશેષત્વમ્ । સાંખ્યશાસ્ત્રે તુ સામાન્યાત્મવિવેકશેષત્વમિતિ દિક્ ॥

વિવેકખ્યાતેસ્ત્વવિદ્યાનાશકત્વમેવ ન તુ શુક્તિરજતવિવેકદર્શિન ઇવ પુનર્ભ્રમદર્શનાત્ પ્રતિબન્ધકત્વં દૃષ્ટાન્તે પટલકામાદિદોષબાહુલ્યાત્ પુનરુજ્જીવનં ભ્રમસ્ય । અત્ર ચ અનાત્મન્યાત્માભિમાનેઽનાદિવાસનૈવ દોષઃ સર્વાસ્તિકસંમતઃ જાતમાત્રસ્યાભિમાને દોષાન્તરાનુપલબ્ધેઃ સા મિથ્યાજ્ઞાનવાસના યદા વિવેકખ્યાતિપરમ્પરાજન્યદૃઢવાસનયોન્મૂલિતા તદૈવ વિવેકસાક્ષાત્કારનિષ્ઠોચ્યતે તત્પૂર્વમવશ્યં વાસનાલેશતો

મિથ્યાંશસ્ય કસ્યાપ્યાત્મનિ ભાનાત્ તસ્યાં ચ વિવેકખ્યાતિનિષ્ઠાયાં જાતાયાં ન પુનરભિમાનઃ સમ્ભવતિ વાસનાખ્યદોષાભાવાદિતિ । યદિ તુ બુદ્ધિપુરુષયોરન્યોન્યપ્રતિબિમ્બનાદિકમવિવેકકારણં દોષ ઇષ્યતે તદા તુ તં દોષં બાધિત્વૈવ વિવેકસાક્ષાત્કાર ઉદિત ઇતિ ન તસ્ય પુનર્ભ્રમહેતુત્વં ફલબલેન યોગજધર્માસહકૃતસ્યૈવ તસ્ય દોષત્વકલ્પનાસમ્ભવાદિતિ । યદ્યપિ વિવેકપ્રતિયોગિપદાર્થાનામાનન્ત્યાદ્વિશેષરૂપેણ વિવેકગ્રહો ન સમ્ભવતિ તથાપિ દૃશ્યત્વપરિણામિત્વાદિરૂપૈઃ સામાન્યવિવેકગ્રહસમ્ભવાત્ પ્રકૃત્યાદિપદાર્થાનાં વિશિષ્ટજ્ઞાનાભાવેઽપિ સામાન્યતો વિવેકખ્યાતેર્મોક્ષહેતુત્વમ્ । તદુક્તમ્ ।
ઘટદ્રષ્ટા ઘટાદ્ભિન્નઃ સર્વથા ન ઘટો યથા ।
દેહદ્રષ્ટા તદા દેહી નાહમિત્યાદિરૂપતઃ ॥ ઇતિ ।
આત્મા વા અરે દ્રષ્ટવ્ય ઇત્યત્ર તુ ન આત્મનો દૃશ્યત્વં વૃત્તિવ્યાપ્યત્વેઽપિ ફલવ્યાપ્યત્વરૂપં યત્તુ બૌદ્ધૈરપિ સુખદુઃખાદિમત્ત્વેનાપિ બુદ્ધિરનુભૂયમાના સ્વપ્રકાશતયા ચૈતન્યવ્યાપ્યા ન ભવતિ યથા વેદાન્તિનામહમિત્યનુભૂયમાનોઽપ્યાત્મા ચૈતન્યાખ્યફલવ્યાપ્યો ન ભવતીત્યુચ્યતે તન્નિઃપ્રમાણત્વાદુપેક્ષ્યમ્ । તત્પ્રધાનાદિસર્ગે ઉત્પદ્યતે । અધર્મવશાત્ પશ્વાદૌ ધર્મવશાદ્દેવાદૌ સંસરતિ । અતત્ત્વજ્ઞાનાદેવ ધર્માધર્મોપરઞ્જિતં પ્રલયકાલે પ્રધાને લીયતે । યદ્યપિ પ્રધાનપુરુષૌ વિભૂ તથાપિ પ્રકૃતિરેવ લિઙ્ગવ્યવસ્થાં કરોતિ । લિઙ્ગં સૂક્ષ્મૈઃ પરમાણુભિસ્તન્માત્રૈરુપચિતં માનુષાદિષુ વ્યવતિષ્ઠતે નટવત્ યથા નટઃ સ્વરૂપેણ એકોઽપિ વેષાન્તરેણ નાનારૂપઃ તથા લિઙ્ગમુદરાન્તઃ પ્રવિશ્ય હસ્તી સ્ત્રી પુમાનિતિ ભવતિ પઞ્ચવિપર્યયસંજ્ઞા ભવતિ યથા તમો મોહો મહામોહસ્તામિસ્રોઽન્ધતામિસ્ર ઇતિ । ધર્મેણ પ્રાજાપત્યાદ્યૂર્ધ્વલોકપ્રાપ્તિઃ । અધર્મેણ પશ્વાદિપ્રાપ્તિરજ્ઞાનેન બન્ધઃ પઞ્ચવિંશતિતત્ત્વજ્ઞાનેનાપવર્ગઃ । તચ્ચ તત્ત્વજ્ઞાનં ગુરોઃ સકાશાત્ શાસ્ત્રશ્રવણેનૈતાદૃશં જાયતે । તથાહિ પ્રધાનાદન્યઃ પુરુષઃ અન્યા બુદ્ધિઃ અન્યોઽહંકારઃ અન્યાનિ તન્માત્રાણિ ઇન્દ્રિયાણિ પઞ્ચમહાભૂતાનિ ચેતિ । સર્વં કાર્યં ત્રિગુણાત્મકમપિ ઉદ્રિક્તગુણાપેક્ષયા સાત્ત્વિકાદિશબ્દવ્યપદેશભાક્ ચેતનઃ પુરુષઃ નાનાયોનિષુ જરામરણકૃતં દુઃખં ચેતયતે પ્રાપ્નોતીત્યર્થઃ । યાવત્ તત્ત્વજ્ઞાનેન લિઙ્ગશરીરં ન નિવર્ત્તતે તાવત્ સ્થૂલં શરીરં પ્રતિજન્મ નૂતનં જાયતે નશ્યતિ ચ । સ્વપ્રયોજનાભાવેઽપિ પ્રત્યુપકારનિરપેક્ષં સુમિત્રવત્ પ્રધાનં

મહદાદિવિષયભૂતપર્યન્તં કાર્યં પુરુષસ્ય ભોગાય મોક્ષાય ચારભતે
પ્રકૃતિઃ પુરુષસ્ય ભેદેન બુદ્ધ્યહંકારાદિ દર્શયિત્વા નિવર્ત્તતે । યથા
નર્ત્તકી શૃઙ્ગારાદિરસૈર્હાસ્યાદિભાવૈશ્ચ નિબદ્ધગીતાદીનિ રઙ્ગસ્ય
દર્શયિત્વા નિવર્ત્તતે કૃતાર્થત્વાત્ તદ્વત્ । કિઞ્ચ પ્રકૃતિર્ગુણવતી
અગુણસ્ય પુંસઃ જગદ્યોનિભાવેન સુખદુઃખમોહાત્મકેન શબ્દાદિવિષયભાવેન
વેત્યેવંવિધૈરુપકારૈરનુપકારિણઃ પુરુષસ્યોપકુર્વતી પશ્ચાદાત્માનં
પ્રકાશ્ય અહમન્યા ત્વમન્ય ઇતિ નિવર્તતે સુમિત્રવત્ આત્મનઃ પ્રત્યુપકારં
નેચ્છતિ ।
સર્ગસ્ય નેશ્વરઃ કારણં ન સ્વભાવો ન કાલઃ કાલોઽપિ યોગિનાં ક્ષણરૂપ
એવ ન તુ ન્યાયવૈશેષિકયોરિવાત્મવદખણ્ડો નિત્ય એકો લાઘવાત્ સ એવ
તત્તદુપાધ્યવચ્છિન્નઃ સન્ ક્ષણમુહૂર્તાદિવત્સરાન્તં વ્યવહારં કરોતીતિ ।
ન તુ ક્ષણનામા પૃથક્ પદાર્થોઽસ્તીતિ ॥

સાંખ્યૈસ્તુ દિક્કાલાવાકાશાદિભ્ય ઇતિ સૂત્રિતં મહાકાલો વા ક્ષણાદિર્વા પૃથક્
પદાર્થો નાસ્તિ કિન્ત્વાકાશમેવોપાધિભિર્વિશિષ્ટં ક્ષણાદિમહાકાલાન્તવ્યવહારં
કુરુતે ઇતિ મન્યતે । તદેતન્મતદ્વયમપ્યસમઞ્જસમિત્યાહ યોગી
સ્થિરેણ કેનાપ્યુપાધિના મહાકાલાકાશાભ્યાં ક્ષણવ્યવહારસ્યાસમ્ભવાત્ ।
તથાહિ ઉત્તરદેશસંયોગાવચ્છિન્ના પરમાણ્વાદિક્રિયા અન્યદ્વા એતાદૃશં
કિઞ્ચિન્મહાકાલાકાશયોઃ ક્ષણરૂપતાયામુપાધિઃ પરૈરિષ્યતે તત્ર ઉક્તં
સંયોગવિશિષ્ટક્રિયાદિકં ચેત્ વિશેષ્યવિશેષણતત્સમ્બન્ધમાત્રં
તર્હિ ત્રયાણામપરૈઃ સ્થિરત્વાભ્યુપગમાત્ ન તૈઃ ક્ષણવ્યવહારઃ
સમ્ભવતિ યદિ ચ તત્તેભ્યોઽતિરિક્તમિષ્યતે ન તુ તન્મહાકાલ
આકાશં વા તેનૈવ ક્ષણવ્યવહારોપપત્તૌ તદવચ્છિન્નસ્યાન્યસ્ય
ક્ષણવ્યવહારહેતુત્વકલ્પનાવૈયર્થ્યાત્ સ ચ વિશિષ્ટાદિરાસ્થિરઃ
ક્ષણઃ પ્રકૃતેરેવાતિભઙ્ગુરઃ પરિણામવિશેષ ઇત્યતો
ન પ્રકૃતિપુરુષાતિરિક્તત્વાપત્તિઃ । તસ્યૈવ ક્ષણસ્ય
પ્રચયવિશેષૈર્મુહૂર્તાહોરાત્રાદિર્દ્વિપરાર્દ્ધાન્તવ્યવહારો ભવતિ
નત્વખણ્ડો મહાકાલોઽસ્તિ પ્રમાણાભાવાત્ અદ્યત્યાદિવ્યવહારઃ ક્ષણપ્રચયેનૈવ
કાલનિત્યત્વશ્રુતિસ્મૃતયસ્તુ પ્રવાહનિત્યતાપરા ઇતિ તસ્માદાવશ્યકત્વાત્
ક્ષણાત્મક એવ કાલો નાખણ્ડો મહાકાલોઽસ્તિ નાપ્યાકાશં કાલવ્યવહારહેતુરિતિ
કિં તુ પ્રધાનમ્ । પુરુષો ન બધ્યતે ન મુચ્યતે નાપિ સંસરતીતિ કિં તુ
નાનાશ્રયા પ્રકૃતિરેવ તથેતિ સર્વં સમઞ્જસમ્ ॥

ઇતિ કાન્યકુબ્જશ્રીષિમાનન્દદીક્ષિતવિરચિતં સાંખ્યતત્ત્વવિવેચનં
સમાપ્તમ્ ॥

Encoded and proofread by Dhaval Patel drdhaval2785 at gmail.com

---

*sAMkhyatattvavivechanam*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*